॥ सनत्सुजातशांकरभाष्य नाम ॥ पत्र २८ ॥

सु०

॥ श्रीगणेशाय नमः ॥ ॐ । नमः पुंसे पुराणाय पूर्णानन्दाय विष्णवे निरस्तनिखिलाध्वान्ततेजसे विश्वहे-
तवे १ नमः आचार्येभ्यो ब्रह्मविद्भ्यः सनत्सुजातविवरणं संक्षेपतो ग्रन्थेन जिज्ञासूनां सुखावबोधायारभ्यते
सनत्सुजातस्य सनातनं सद्द्वितीय ब्रह्मात्मस्वरूपोपलब्ध्यात्मत्वाश्रययास्य विषयया । विद्यया स्वानुभवगम्यया स्वाभा-
विकं चित्सनातनं सद्द्वितीय ब्रह्मात्मभावात्प्रच्युतो नात्मनि देहादावात्मभावमापन्नो प्राप्तश्रेयः पुरुषार्थः
प्राप्तश्रेयानर्थो विद्यापरिकल्पितेष्वसाधनेष्टप्राप्तिमनिष्टपरिहारं च काङ्क्षन् लौकिकवैदिकसाधने-
ष्वनुष्ठितेष्वपि परमपुरुषार्थं मोक्षमलभमानो मकरादिभिरिव रागद्वेषादिभिरितस्ततः प्राकृष्यमाणः सुर-
नरतिर्यगादिप्रभेदभिन्नेषु नानायोनिषु परिवर्तमानो मोमुह्यमानः संसरन् कथंचित् पुण्यवशाद्वेदोदितेश्व-
रार्थकर्मानुष्ठानेनापगतरागादिमलो नित्यानित्यदर्शनेनोत्पन्नेहामुत्रभोगविरागो वेदान्तेभ्यः प्रतीयमानः
ब्रह्मात्मभावं बुभुत्सुर्वेदोदितशमदमादिसाधनसंपन्नो ब्रह्मविदमाचार्यमुपेत्याचार्यानुसारेणैव वेदान्तश्रव-
णादिना हं ब्रह्मास्मीति ब्रह्मात्मतत्त्वमवगम्यानिवृत्ताज्ञानतत्कार्यो ब्रह्मस्वरूपो च तिष्ठति । इतीदं वेदान्तमर्यादा एत-
त्सर्वत्रमेव दर्शयिष्यति भगवान्सनत्सुजातः धृतराष्ट्रः शोकमोहाभिभूतः तरति शोकमात्मविदिति वेदान्त-
वादमुपश्रुत्य ब्रह्मविद्याविना शोकापनयनमशक्यं मत्वा नोऽनुक्तं यदि ते किंचिद्वाचा विदुर विद्यते इति विदुरं प्रो-
क्तवान् सोऽपि परमकारुणिकः सर्वज्ञः सन् ब्रह्मविद्याविशिष्टाधिकारविषयां मन्वानः शूद्रयोनावहं जातो ना-
तोऽन्यद्वक्तुमुत्सहे इति मृद्योनित्वात्तिरोपनिषद्ब्रह्मात्मतत्त्वज्ञानेनाहमधिकृतस्तु कथमनेन ब्रह्मविद्यया
परमेव परमात्मनि पूर्णानन्दे स्वाराज्ये स्थापयिष्यामीति मन्वानः श्रद्धेयोपनिषत्प्रसिद्धमितिहासं स्मृत्वा
नान्योऽस्मादनंतमसः परं परमात्मानं दर्शयितुं शक्नुयादिति मत्वा तमेवं भगवन्तं सनत्सुजातं योगबलेना [illegible] नी
य प्रत्युत्थानादिभिर्भगवन्तं पूजयित्वा भगवन्संशयः कश्चिद्धृतराष्ट्रस्य मानसे यो न शक्यो मया वक्तुं त-
मेव त्वमर्हसि व्याख्यातुम् [illegible]

एवं पृष्टः प्रह्व भगवान्सनत्सुजातः । अमृत्युरिति केचित्तु नरा विद्याधिरूढाः परमार्थतो मृत्युसद्भावं मन्यमाना वे
दोक्तेन कर्मणा अमृत्युः । अमृतत्वं भवतीति मत्वा अमृतस्य वै । अमृतत्वप्राप्तये वेदोक्तं कर्माचरंति तथान्ये विषय
विषो धाविषयव्यतिरेकेण निर्विषयं मोक्षमन्यमानाः कर्मणैवामृत्युरमृतत्वं देवादिभावं वर्णयंति तत्रैव
चरागिणो गीतं श्लोकमप्युदाहरंति अविदृस्यवनेभ्यस्त्येभ्यगालत्वं संवांछति नतु निर्विषयं मोक्षं करादिद्रप
ओतमहति तथैव परमात्मव्यतिरेकेण द्वितीयमपश्यंतो ज्ञानकर्मभ्याममृतत्त्वं वर्णयंति । अपरे पुनर्द्विती
यात्मदर्शिनः आत्मव्यतिरेकेण द्वितीयमपश्यंतो मृत्युर्नास्तीति वर्णयंति हे राजन्यथैतत्पक्षयोर्विशेषः संभ
ति तथा ब्रुवतो मे मम वाक्यं शृणु मा विशंकिथाः मयोक्तेऽर्थे कामा मा कृथाः ३ कथमुभे इति येद्धर्वाक्ये मृत्योरा
स्तित्वनास्तित्वे उभे हे सत्ये क्षत्रियाद्यप्रवृत्ते आदिसर्गमारभ्य प्रवृत्ते । अथवा क्षत्रिय क्षत्रियप्रधानप्रवृत्ते वर्तमा
ने कथं पुनरुभयोः परस्परविरुद्धयोरस्तिनास्तिनास्तित्वयोः सत्यत्वमिति तत्राह मोहो मृत्युः संमतो यः कवीनामिति

सनत्सुजात उवाच अमृत्युः कर्मणा केचिन्मृत्युर्नास्तीति चापरे शृणु मे ब्रुवतो राजन्यथैतन्मा विशंकिथाः ३ ॥
उभे सत्ये क्षत्रियाद्य प्रवृत्ते मोहो मृत्युः संमतो यः कवीनां प्रमादं वै मृत्युमहं ब्रवीमि सदा प्रमादममृतत्वं ब्रवीमि ४

भवेदयं विरोधोऽस्तित्वनास्तित्वयोर्यदि परमार्थरूपो मृत्युः स्यात् कस्तर्हि यो मोहो मिथ्याज्ञानमनात्मन्यात्माभिमानः स
मृत्युः केषांचित्कवीनां मतः अहं तु न तथा मृत्युं ब्रवीमि कथं तर्हि प्रमादं मृत्युमहं ब्रवीमि प्रमादः प्रच्युतिः स्वाभाविकब्रह्म
भावात् तं प्रमादं मिथ्याज्ञानस्य विकारं आत्मानवधारणमात्माज्ञानं मृत्युं जननमरणादिसर्वानर्थबीजमहं ब्रवीमि ।
तथा अप्रमादं स्वाभाविकब्रह्मरूपेणावस्थानममृतत्वं ब्रवीमि तथा च श्रुतिः स्वरूपावस्थानमेव मोक्षं प्रदर्शयति
परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति तथा अनुगीतासु स्पष्टमाह एकोऽयं तो नास्ति ततो द्वितीयो यो हृच्छ
यस्तमहं ब्रवीमि यतः स्वरूपावस्थानलक्षणो मोक्षः अत एव चतुर्विधः क्रियाफलविलक्षणत्वादेव न कर्मसाध्यम
मृतत्वं नापि समुच्चिताभ्यां ज्ञानकर्मभ्यामिति अमृत्युः कर्मणा केचिदित्येतदनुपपन्नमेव मृत्युतं भवति यस्तिवा
त्मपक्षस्य निराकरणं स्वयमेव कर्मोदयेऽकर्मफलानुरागाः तेनानुयांति ते न्योरंति मृत्युं ज्ञानेन विहातेजः अस्मेतिनि

तमसोऽस्माद्दोषस्य पिपासभयाभये ॥ अरतिश्चैव लोकश्च कामक्रोधौ क्षयोदयाविति भगवन्येनासौ सकलसं
सारकारणधर्माधर्मवर्जितः सुखदुःखातिगो भवेत् तमस्मै धृतराष्ट्राय वक्तुमर्हसीत्युक्तवान् तत एतद्वा
क्यसमनन्तरं वैशंपायन उवाच ततो राजेति विदुरेण सनत्सुजातं प्रति ईरितमुक्तं यद्वाक्यं तत्संपूज्य सं
मान्य सनत्सुजातं सनदिति सनातनं ब्रह्म उच्यते हिरण्यगर्भो वा तस्मात्समात्तं ब्रह्मलोकमानसात् ज्ञा
नवैराग्यादिसमन्वितो जात इति सनत्सुजात इत्युक्तो भगवान्सनत्कुमारस्तं रहिते रहसि प्राह तत्र जनवर्जि
ते महात्मा महाबुद्धिः पप्रच्छ पृष्टवान् बुद्धिं परमामुत्तमां पूजनं च द्वितीयमित्येवं बुभूषन् भवितुमिच्छन्

वैशंपायन उवाच ततो राजा धृतराष्ट्रो मनीषी संपूज्य वाक्यं विदुरेरितं तत् सनत्सुजातं रहिते ।
महात्मा पप्रच्छ बुद्धिं परमां बुभूषन् १ धृतराष्ट्र उवाच सनत्सुजात यदिदं शृणोमि मृत्युर्हि ना
स्तीति तवोपदेशः देवासुरा ह्याचरन् ब्रह्मचर्यममृत्यवे तत्कतरन्नु सत्यं २ ॥ रामः ॥ रामः ॥ श्री १

ब्रह्म प्रविविक्ष्यापहतमात्मानं लब्धुमिच्छन्नित्यर्थः २ तदेवाह धृतराष्ट्रः सनत्सुजातेति हे सनत्सुजा
त यन्मृत्युर्हि नास्तीति शिष्यान्प्रति उपदिश्यसीति विदुरः प्राह देवासुराः पुनरमृत्यवे मृत्योरभावाय
अमृतत्वप्राप्तये ब्रह्मचर्यमाचरं तो गुरौ वासं कृतवन्तः श्रूयते च छान्दोग्ये तद्धोभये देवासुरा अनु
बुबुधिरे इत्यारभ्य तौ ह द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमूषतुरिन्द्रविरोचनयोः प्रजापतौ ब्रह्मचर्यचरण
मेकशतं ह वै वर्षाणि मघवा प्रजापतौ ब्रह्मचर्यमुवासेति च यदि मृत्युर्नास्तीति तव पक्षः कथं देवासुराणा
ममृत्यवे ब्रह्मचर्यचरणं तत्र वादिसुसन्नवासन्नावपक्षयोः कतरन्नु सत्यं तद्वक्तुमर्हसीत्यभिप्रायः ॥ २ ॥

एतद्धस्मवैतत्पूर्वे श्रोत्रियाः अनूचाना विद्वांसः प्रजां न कामयंते पुत्रकर्मापरविद्यानामनुपयोगं दर्शयंतिस्म तथा: किं प्रजया करिष्या
मो येषां नोयमात्मायं लोक इति ते ह स्म पुत्रैषणायाश्च लोकैषणायाश्च वित्तैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंतीति = ११ =

रो विज्ञायेति ज्ञानस्य मोक्षसाधनत्वं दर्शितं तथा न ज्ञानं वस्तुपरतंत्रमिति वक्ष्यति च भगवान् ज्ञानस्यैव मोक्षसाध
नत्वं ॥ अतएव लः क्षत्रियेति एवं मन्तुं जायमानं विदितं निचि तथा च मोक्षधर्मे कर्मणा बध्यते जंतुर्विद्यया च विमुच्य
ते तस्मात्कर्म न कुर्वंति यतयः पारदर्शिन इति ज्ञानं विप्रोत्तमं हि यज्ञादितिच तथा ज्ञानस्यैव मोक्षसाधनत्वं मन्य
मानः सर्वकर्मपरित्यागमाह भगवान्वेदाचार्यो मनुः यथोक्तान्यपि कर्माणीति तथा चाह भगवान्परमेश्वरः ॥
ज्ञानं तु केवलं सम्यगपवर्गफलप्रदं तस्माद्वर्ज्जिर्विमलं ज्ञानं वै कल्पसाधनं ज्ञातव्यं हि प्रयत्नेन श्रोतव्यं द्रष्टव्यमे
व च एकः सर्वत्रगो ह्यात्मा केवलश्चितिमात्रकः आनंदो निर्मलो नित्यः स्यादेतत्सांख्यदर्शनं एतदेव परं ज्ञान
मेतन्मोक्षोनुगीयते एतत्कैवल्यममलं ब्रह्मभावश्च वर्णितः आश्रित्य तत्परं तत्त्वं तन्निष्ठास्तत्परायणाः ग
च्छंति मां महात्मानो यतयो विश्वमीश्वरं एवं तर्हि कर्माणि नानुष्ठेयानि न नानुष्ठेयानि किंतु ज्ञानिना नानु
ष्ठेयानि तथा चाह भगवान् यस्त्वात्मरतिरेव स्यादिति तथा च ब्राह्मणे कावषेयाः किमर्थं वयमध्येष्यामहे किमर्थं वयं यक्ष्यामहे तथा च बृहदारण्यके विद्वांसः सर्वकर्मन्यासं दर्शयंति
एतद्धस्मवैतदिति तथा च लैंगे योगिनामस्ति नत्र ज्ञाःस्मेति तथा चाथर्वणश्रुतिः नैतद्विद्वानिति केनत र्ह्यनुष्ठेयानि
अज्ञानिना प्रारुरुक्षुणा सर्वकर्माणि सदानुष्ठेयानि नज्ञानिना तथा चाह भगवान् लोकेस्मिन्द्विविधा निष्ठेति आरु
रुक्षोर्मुनेर्योगमिति तथा चाह भगवान्सत्यवतीसुतः द्वाविमावथ पंथानौ यत्र वेदाः प्रतिष्ठिताः प्रवृत्तिलक्षणो धर्मो
निवृत्तिश्च विभाषितः नन्वेवं प्रारुरुक्षुणापि कर्माणि नानुष्ठेयानि कर्मणां बंधहेतुत्वात् तथा चोक्तं कर्मणा बध्यते जंतु
र्विद्यया च विमुच्यत इति सत्यं तथापि ईश्वरार्थतया फलनिरपेक्षमनुष्ठीयमानानि न बंधहेतूनि तथा चोक्तं भगवता
यज्ञार्थात्कर्मण इति किमर्थं तर्हि तेषामनुष्ठानं सत्त्वशुद्ध्यर्थमिति ब्रूमः तथा चोक्तं भगवता कायेन मनसा बुद्ध्या यतो
दानं तपश्चैव पावनानि मनीषिणामिति ज्ञानसंसिद्धिं च तथा कथयापि कर्माणि ज्ञानं तु परमा गतिः कषायैः कर्मभिः
पक्वे ततो ज्ञानं प्रवर्तते ननु कर्मणामपि विद्यासहितानां मोक्षहेतुत्वं श्रूयते विद्यां चाविद्यां च यस्तद्वेदोभयं सह इति त
था च मनुः तपो विद्या च विप्रस्येति नैवं पूर्वापरानुसंधाननिबंधनो ह्ययं भ्रमः तथा हि विद्यां चाविद्यां च यस्तद्वेदोभयं सह
उक्त्वा अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इति विद्याविद्ययोर्भिन्नविषयत्वेन समुच्चयाभावः श्रुत्यैव दर्शितः ॥

ईशाद्यष्टोत्तरशतोपनिषत्सु शाखाभाष्ये ४

२०सु०

३

र... मेन स्वरूपगम्यते प्रमादो ऽमृत्युरप्रमादो ऽमृतत्वमिति तत्राह प्रमादादिति प्रमादात्स्वाभाविकब्रह्मभावप्रच्यवनात् अ
नात्मनि देहादावात्मभावादसुरा विरोचनप्रभृतयः पराभवन्पराभूताः तथा च श्रुतिः अनुपलभ्यात्मानमि
त्यारभ्य देवा वा असुरा वा ते पराभविष्यन्तीत्यन्तेन तथा अप्रमादात्स्वाभाविकचित्सदानन्दाद्वितीयब्रह्मात्मज्ञानावस्था
नात् ब्रह्मभूताः सुराश्चेन्द्रादयः तथा च श्रुतिः तं देवा आत्मानमुपासते तस्मात्तेषां सर्वे च लोका आप्ताः सर्वे च का
मा इत्यादिना अथवा सुषुप्तावेन्द्रियेष्वेव रमन्ते अनात्मविदो वैषयिकाः प्राणिनो ऽसुरास्ते स्वाभाविकब्रह्मभावमतिक्र
म्यानात्मनि देहादावात्मभावमापन्नाः पराभवन्ति येनापि योनिमापन्नाः तथा च बृहदारण्यकोपनिषत् तस्मान्न
प्रमाद्येत तन्नातीयादिति तथा त्वस्मिन्नात्मन्येव रमन्त इत्यात्मविदः सुराः तथा चोक्तं मात्मन्येव रतिर्येषां त्वस्मिन्ब्रह्म
णि चाचले ते सुरा इति विख्याताः स्वरूपश्च सुरा मता इति अप्रमादात्ते स्वाभाविकब्रह्मात्मनावस्थानात् ब्रह्मभूता
नित्यमिथ्याज्ञानतत्कार्यान् ब्रह्मैव सन्तो वृत्ता इत्यर्थः ननु यम एव सर्वजन्तूनामपहारको मृत्युः प्रसिद्धः कथमुच्यते प्रमाद एवे

प्रमादाद्वा असुराः पराभवन्नप्रमादाद्ब्रह्मभूताः सुराश्च नैव मृत्युर्व्याघ्र इवात्ति जन्तून्न ह्यस्य रूपमुपलभ्यते ह ५ यमं त्वे
के मृत्युमतो ऽन्यमाहुरात्मावासममृतं ब्रह्मचर्यं पितृलोके राज्यमनुशास्ति देवः शिवः शिवानामशिवो ऽशिवानां ६॥

मृत्युमहं ब्रवीमीति तत्राह नैव मृत्युरत्ति न भक्षयति प्राणिनः यदि भक्षयेद्व्याघ्र इवास्य रूपमुपलभ्येत न चोपलभ्यते तस्मा
न्नास्त्येव मृत्युः ५ ननूपलभ्यते सावित्र्युपाख्याने अथ सत्यवतः कायादिति कथमुच्यते नास्य रूपमुपलभ्यत इति तत्राह
(मु२) यममिति मृत्युरुपलभ्यते तथापि न साक्षान्मृत्युः कस्तर्हि यः प्रमादाख्यो ऽज्ञानं मृत्युः स एव साक्षाद्विनाशहेतुत्वात् ते
यां ज्ञानस्य विना प्राप्तिहेतुत्वं श्रूयते न चेदिहावेदीन्महती विनष्टिरिति बृहदारण्यके अमौ ... अज्ञानस्य साक्षान्मृत्युत्वं (दा)
दर्शितं मृत्युर्वै तमो ज्योतिरमृतमिति यस्मात्प्रमाद एव सर्वानर्थबीजं तस्मान्न प्रमाद्येत चित्सदानन्दाद्वितीयब्रह्मात्म
भावेनैवावतिष्ठेतेत्यर्थः तथा चाज्ञानस्य बन्धहेतुत्वं विज्ञानस्य मोक्षहेतुत्वमुक्तं भगवता अज्ञानेनावृतं ज्ञानमिति यस्मा
त्प्रमाद एव मृत्युरप्रमादो ऽमृतत्वं अत एव न कर्मसाध्यममृतत्वं नापि कर्मप्राप्यं नित्यसिद्धत्वान्नित्यप्राप्तत्वाच्च त
था च श्रुतिः एष नित्यो महिमा ब्राह्मणस्येति तथा तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यते ऽयनाय तमेव धी

दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं ॥ अध्यात्म
योगाधिगमेन धीरो मत्वा योगी हर्षशोकौ जहाति =६=

यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र
को मोहः कः शोक एकत्वमनुपश्यत इति =५=

सं॰सु॰ ना स्थित्वा ध्यायेत्पुरिशायं देवं पूर्णानन्दं निरंजनं अरूर्वानपरं ब्रह्म नेति नेत्यादिलक्षणं अप्राणापानस्पष्टमनु
५ दितानन्तमितं ज्ञानात्मनावस्थितं परमात्मानमोमिति तथाचोक्तं ब्रह्मविद्भिः विविक्तदेशमासीन सन्न्यासेनाभ्युध
चेतसा भावयेत्सर्वमात्मानं हृदयाकाशमध्यविभुमिति तथाचोक्तं गायत्रे तस्मादिमोक्षायपकुरुप्रयत्नमिति एवं
युंजन्सदात्मानं परमात्मत्वेन यदा साक्षाद्विजानाति तदा निरस्ताज्ञानतत्कार्यो वीतशोकः कृतकृत्यो भवति तु
था बृहदारण्यके आत्मानं चेद्विजानीयादिति तथाचेशावास्ये यस्मिन्सर्वाणीति तथा कठवल्लीषु तं दुर्द
र्शमिति तथा कावषीयश्रीतासु आत्मरतः शोकसंतीर्णो न बिभेति कुतश्चनेति तथाच मनुः सर्वेषामपि चैतेषा
मात्मज्ञानं परं मतमिति तथाचाह भगवान् एतद्बुद्ध्वा बुद्धिमान्स्यात्‌ यस्मात्तद्विज्ञानादेव परमपुरुषार्थप्राप्तिः
जानी॰ तस्मात्तमेव परमात्मानं दात्म नमात्मत्वेनैवाद्यमहमस्मीति नाकिंचिदन्यच्चिन्तयेत् तथाच श्रुतिः तमेव धीरो विज्ञा
येति तथाचाह भगवान् [illegible] संकल्पप्रभवान्कामानिति एवं प्रसंगात्सर्वशास्त्रार्थं संक्षेपेणो
४ पदिष्टः अथेदानीं प्रकृतमनुसराम: यस्मात्समारएवसर्वानर्थबीजं तस्मात्समारमेवाहं मत्तुं ब्रवीमिन
यमं यमंतु पुनरेकविषयाविद्याधिरूढः स्वात्मव्यतिरेकेण वर्तीयपदं यतो मत्तु अतोयमात्म
मत्योऽस्मादस्मादन्यम्मस्त्वन्तरं वैवस्वतमाहुः आत्मावासमात्मनि बुद्धो वसतीत्यात्मावासस्तं तथाच मनुः
यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः तेन चेदविवादस्ते मा गंगां मा कुरून्गमः अप्रमत्तमसारएधर्माणां
ब्रह्मचर्यं ब्रह्मणि तत्समभूते तेनर्माणं ब्रह्मनिष्ठमित्यर्थः श्रूयते च कठवल्लीषु कस्तं मदामदं देवं मदन्यो ज्ञातुम
र्हतीति पितृलोकराज्यमनुप्रवर्तीति शिवः सुखप्रदः शिवानां पुण्यकर्मणां अशिवोऽसुखप्रदः अशिवा
नां पापकर्मणां ॥ ६ ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥

इदमेवस्फुटमाह भगवान्मनुः तपोविद्याचविप्रस्यनिःश्रेयसकरावुभौविमुक्तेः समुच्चयाशंकामाभूदिति तपसाकल्मषं
हंति विद्ययामृतमश्नुत इति तपसा नित्यनैमित्तिकस्वकर्मणा चित्तशुद्धावेव विनियोगं दर्शितवान्मनुः तथा ईशावास्यमि
दंसर्वमितिसर्वस्यतावन्मात्रत्वमुक्त्वा तदात्मभूतस्यसर्वस्यतन्मात्रत्वंपश्यतस्तद्दृष्ट्यातेनैवकृतार्थस्यसाध्यान्तरमपश्य
तस्त्यागेनैवभुंजीथा इति त्यागेनैवात्मपरिपालनमुक्त्वा अतदात्मवेदिनः केन तर्हि आत्मपरिपालनमित्याशंक्य कुर्वन्ने
वेहकर्माणि जिजीविषेच्छतंसमाः एवंत्वयिनान्यथेतोस्ति न कर्म लिप्यते नरे एवंसर्वंभूतेत्वदिनरमात्राभिमानिमत्ते वि
धानिमित्तोक्तेरस्वोपायोक्तेर्विनाभ्युपायाभावात् कुर्वन्नेवेह सदा यावज्जीवं जिजीविषेदित्यस्य नरमात्राभिमानिनः शुद्ध्यर्थं
यावज्जीवं कर्माणि इष्यते अन्तराभिरपिवावेः कर्मणां शुद्धिसाधनत्वमवगम्यते न मोक्षसाधनत्वं यदप्युक्तं तेनैव त्र
[illegible] च शब्दात्समुच्चयोवगम्यते तदपि प्रसिद्धविनियोगानुसारेण योजयितव्यं तथा च गीता
सु स्फुटमाह भगवान् कर्मणां शुद्धिद्वारेणैव मोक्षसाधनत्वं नित्यनैमित्तिकेष्विति वक्ष्यति भगवान्सनत्सुजातः शुद्धि
द्वारेणैव मोक्षसाधनत्वं तदर्थमुक्तं तपसेति ननु कथं सत्त्वशुद्धिद्वारेणैव मोक्षसाधनत्वं विनापि सत्त्वशुद्धिं ज्ञानेनैव
मोक्षः सिध्यत्येव सत्यं ज्ञानेनैव मोक्षः सिध्यति किंतु तदेव ज्ञानं सत्त्वशुद्धिं विना नोत्पद्यते इति क्रमः तथा चोक्तं ज्ञानमुत्प
द्यते पुंसां क्षयात्पापस्य कर्मण इति तथा चाह याज्ञवल्क्यः तथा विपक्वकरणः प्राप्तात्मज्ञानस्य न क्षम इति विशुद्धसत्त्व
स्यैव नित्यानित्यवस्तुविवेकादिद्वारेणैव मोक्षसाधनज्ञाननिष्पत्तिः तस्मात्सत्त्वशुद्ध्यर्थं सर्वेश्वरमुद्दिश्य सर्वाणि वाङ्म
नःकायजन्यकर्माणि श्रौतस्मार्तानि नित्यकर्माणि समाचरेत् यावच्चित्तशुद्धस्य इहामुत्रभोगविरागो योगारूढो भवति तथा
चाह भगवान् आरुरुक्षोर्मुनेर्योगमिति संन्यासस्तु महाबाहो दुःखमाप्तुमयोगत इति तस्य लक्षणमुक्तं यदा हि नें
द्रियार्थेष्विति यस्तु पुनरेवं यज्ञदानादिना विशुद्धसत्त्व इहामुत्रभोगविरागो योगारूढो भवति तस्य शम एव कारणं न
कर्म तथा चोक्तं योगारूढस्य तस्यैव शमः कारणमुच्यते तस्माच्छमदमादिसाधनसंपन्नः श्रवणादिसमन्वितो योगी
युंजीत सततमात्मानं रहसि स्थित इति कथं तर्हि योगानुष्ठानं कुर्यात् समे देशे शर्करावह्निवालुकापरजनाद्याश्रयादि
वर्जिते मनोनुकूले शुचौ नात्युच्छ्रितं नातिनीचं चेलाजिनकुशोत्तरं स्थिरमासनं प्रतिष्ठाप्य तत्रोपविश्य आसनं
स्वस्तिकादि बध्वा समं कायशिरोग्रीवं धारयन् विष्टादीन् क्रमेण कायकरणविनिर्मुक्तेः सर्वेन्द्रियाण्युपसंहृत्य पूर्णेनम

स॰सु॰
५

किंच नइति ते ऽहंकारादिरूपेण तेनाज्ञानेन मोहितादेहाद्यात्मभावमापादिता स्तद्गुणोऽहंकाराद्यात्मनापरिणताश्मारा
त्याऽमृत्युवप्रोवर्त्तमाना अतोऽस्मात्प्रेताधूमादिमार्गेणगत्वा तत्र परलोके यावत्संपातमुषित्वा पुनराकाशादिक्रमेण दे
हग्रहणाय निपतंति श्रूयते च तस्मिन्यावत्संपातमुषित्वा अथैतमेवाध्वानं पुनर्निवर्त्तंते ततो नेतद्देहग्रहणाव
स्थायां तद्देवाद्रियाति अनुस्यूतकर्मादि परिसंभ्रमतां सर्वे ते संभ्रमतः परिवर्त्तंत इत्यर्थः अतोऽस्मात्कारणादि
ह्रियमुख्यानुचरणस्मरणं याति ततो मरणं जन्माभ्युपैतीति तो मृत्युं एवं जन्ममरणप्रबंधारूढो न कदाचिन्मुच्यत
इत्यर्थः आत्माज्ञाननिमित्तत्वात्संसारस्य यावत्परमात्मनि मात्मत्वेन न साक्षात् जानाति तावदयं तापत्रयाभिभूतो म
करादिभिरिव रागादिभिश्चित्ततः समाकृष्यमाणो मोमुह्यमानोऽवतिष्ठत इत्यर्थः ८ एवं तावदविद्याकामयोर्बंधहे

तेमोहितास्तद्गुणवर्त्तमाना अतः प्रेतास्तत्र पुनः पतंति ततस्तं देहाग्रमनुपरिसंवर्त्तंते ततो मृत्युं मरणाद्भ्युपैति ८ ॥
कर्मोदये कर्मफलानुरागास्तत्रानुयांति न तरंति मृत्युं सदर्थयोगानवगमात्समंतात्प्रवर्त्तते भोगयोगेन देही ९ ॥

तुत्वमभिहितं अथेदानीं कर्मणो बंधहेतुत्वमाह कर्मेति अयमर्थः कर्मणो क्वचिदाचरितकर्मणा स्वर्गलंभवतीति यन्मतं।
ततस्तु पन्यस्तं तन्निराकरोति न केवलं कर्मणो मोक्षलंभवति अपि तु कर्मोदये कर्मणा मुत्पत्तौ कर्मफलानुरागाः संतस्तत्र
तस्मिन्कर्मफलेऽनुयांति यस्मात्तत्रैवानुयांति अतो न तरंति मृत्युं पुनः पुनर्जन्ममरणात्मके संसारे परिवर्त्तत इत्य
र्थः कस्मात्पुनः कर्मोदये कर्मफलानुरागास्तत्रैव परिवर्त्तंते सदर्थयोगानवगमात् सदर्थेन योगः सदर्थयोगः परमा
त्मनासंयोगस्तस्य सदर्थयोगस्य एकत्वस्यानवगमात् स्वात्मनश्चित्सदानंदाद्वितीयब्रह्मतत्वभावानवगमादित्य
र्थः समंतात्समंततः प्रवर्त्तते भोगयोगेन विषयरसतृष्णादेही यथा घ्रंधो ऽभिम्लोऽन्नतकंटकस्थानादिषु परिभ्रम
ति एवं समाचप्रि विवेकहीनः सर्वत्र विषयाकांक्षया परिभ्रमति ९ ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥

श्रो॰
५

एवं तावत्प्रमाद एव मृत्युरिति मृत्योरूपं निर्द्धारितं इदानीं तस्यैव कार्यात्मनावस्थानं दर्शयति ॥ आस्यादिति यः
प्रमादाख्यो मृत्युः स प्रथमम् आस्यात्मनापरिणमते ॥ आस्यो ऽभिमानात्मको ऽहंकारः तथा चोक्तं सर्वार्थाक्षेपसंयो।
गात्सुखात्सुखमन्वयात् आस्य इत्युच्यते घोरो ह्यहंकारो गुणो महान् एवमहंकारात्मना स्थित्वा ततो ऽहंकारान्निःस
रति निर्गच्छति कामात्मना ततः कामः स्वविषये प्रवर्तमानः प्रतिहतः क्रोधः प्रमादो मोहरूपश्च भवति ततो ऽहंगतेना
हंस्वरूपमापन्नेनाहंकाराद्यात्मना स्थितेनात्मानेन तदात्मभावमापन्नो ब्राह्मणो ऽहं क्षत्रियो ऽहं वैश्यो ऽहं स्थूलो ऽहममुष्य
पुत्रो ऽस्मीत्येवमात्मीकोरागद्वेषादिसमन्वितश्चरन्विमार्गान् श्रौतस्मार्तविपरीतमार्गान् न चात्मनः परमात्मनो योगं प्रेत्यापि

॥ आस्यादेष निः सरति नराणां क्रोधः प्रमादो मोहरूपश्च मृत्युः ॥
॥ अहंगतेनैव चरन्विमार्गान्न चात्मनो योगमुपैति कश्चित् ७ ॥

नैरुत्यसमाधिलक्षणमुपैति कश्चिदपि ॥ अथवा अविद्याकामकर्माणि संसारस्य प्रयोजकभूतानि तत्रैव मोहो मृत्युः सं
मत इत्यनेना ऽग्रहणान्यथाग्रहणात्मिका अविद्या दर्शिता उत्तरत्र कर्मोदय इति कर्म वक्ष्यति ॥ अथेदानीं कामो ऽभिधी
यते ॥ असंवृत्ते क्षिप्यते अनेन संसारे प्राणिन इति आस्यः कामः ॥ अथवा आस्यवदास्यं सर्वजघस्त्वात् तथा चोक्तं
भावना कामरूपश्च क्रोधरूप इति ॥ अथैष मृत्युरास्यात्मना स्थितत्वात्ततः क्रोधात्मना परिणमते उक्तं च कामात्क्रोधो ऽभिजाय
त इति ततो ऽहंगतेनाहंकारापन्नेनात्मनाहंकारफलकारेण देहाद्यभिमानेन चरन्विमार्गान्न चात्मनो मार्गमुपैति कश्चित् ७

आत्मना=

स॰सु॰
६

ततः किमिति चेत्तद्भवति तन्नाह ।अभिध्येति ।अभिध्या विषयध्यानं प्रथमं हंति विनाशयति स्वरूपात्प्रच्युतिं क-
रोति ततो विषयध्यानाभिहतमेनं विषयरससन्निधौ प्रीतिं प्रतिगृह्यमाणं श्च हंति ततः कामाभिहतमेनं प्रति-
गृह्य क्रोधश्च हंति तदेते ।अभिध्यानादयः एतान् अभिध्या कामक्रोधवशंगतान् बालान विवेकिनो मूढान्मृत्य-
वे प्रापयंति प्रक्षिपंति श्रूयते च कठवल्लीषु पराञ्चि खानीति धीरास्तु धैर्येण विषयान् जित्वा परमात्मानमा-
त्मत्वेनावगम्य तरंति मृत्युं श्रूयते च निचाय्य तं मृत्युमुखात्प्रमुच्यत इति ११ कथं पुनर्धीरास्तु धैर्येण विषयान्
जित्वा मृत्युं तरंतीत्याह य इति योभिध्यायन् अनित्याशुचिदुःखान् विदित्वा यो स्मति हन् उत्पतिष्णूनुत्पतंती-
त्युत्पत्तिमंतो विषयास्तान्निहन्यात्परित्यजेत् अनाचारेणानादरेणाभिध्यादर्शनस्वरूपप्रतिबुध्यमानः पुनः पुनश्चिं-

अभिध्या वै प्रथमं हंति चैनं कामक्रोधौ गृह्य चैनं च पश्चात् एतान्बालान्मृत्यवे प्रापयंति धीरास्तु धैर्येण तरंति मृत्युं ११
योभिध्यायन्नुत्पतिष्णून्निहन्यादनाचारेण प्रतिबुध्यमानः स वै मृत्युं मृत्युरिवात्ति भूत्वा ह्येवं विद्वान् यो विनिहंति ह।
कामान् १२ कामानुसारी पुरुषः कामाननु विनश्यति कामान्व्युदस्य धुनुते यत्किंचित्पुरुषो रजः १३ ॥

6

तयन् स वै पुरुषो मृत्योरपि मृत्युर्भूत्वा मृत्युरिवात्ति मृत्युं उक्तं च विषयप्रीतिसंहारं यः करोति विवेकतः स मृत्योर्मृ-
त्युरिति ख्यातः स विद्वानात्मवित्कविरिति एवमनित्यादिरूपेण विद्वान्सन्ननादरादिनाभिहंति कामान् १२
यः पुनरनादरादिना नाभिहंति स किं करोतीत्यत आह कामेति यस्तु पुनर्विषयाभिध्यानेन कामानुसारी भवति सो।
कामाननु विनश्यति कामविषयेन ह कामाननु कामैः सह विनश्यति ।अनित्याः कामगणाः प्रतिक्षणविना-
शिनस्तद्वत्कामी विनाशी भवति यस्तु पुनर्विषयदोषदर्शनेन कामान्परित्यजति स कामान् व्युदस्य परित्य-
ज्य विवेकबुद्ध्या धुनुते ध्वंसयति यत्किंचिदिह जन्मांतरे वोपार्जितं रजः पुण्यपापादिलक्षणं कर्म १३ राम

६

किंच तद्धाहति यज्ञागादिभूतस्य इंद्रियाणां विषयेषु प्रवर्तनं तन्महामोहनं एतदुक्तं भवति यस्य विषयेषु नवास्तववु-
द्धिस्तस्येंद्रियाणि विषयेषु न प्रवर्तंते तस्य विषयेषु प्रवृत्त्यभावादात्मन्येव प्रवृत्तिः ततश्च मोहनिवृत्तिः यस्य विषये-
षु वास्तवबुद्धिस्तस्येंद्रियाणां पराग्भूतेषु विषयेषु प्रवृत्तत्वान्नालाविमम द्वितीयस्वरूपभूतं परमात्मानमात्मत्वेन
साक्षाज्जानाति तथा चोक्तं स्त्रीपिंडसंपर्केण तु विनचेतसो विषयांधा ब्रह्म न जानंतीति ततश्च महामोहेन पुनः पु-
नर्विषयेषु प्रवृत्तिः तथा चाह मनुः न जातु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिव-
र्धत इति ततश्च मिथ्यार्थैरविद्याकल्पितैः शब्दादिविषयैर्योगो भवति तस्मिन्मिथ्यार्थयोगे ऽस्य देहिनो गतिः

तद्धे महामोहनमिंद्रियाणां मिथ्यार्थयोगेऽस्य गतिर्हि नित्या ॥
मिथ्यार्थयोगाभिहितांतरात्मा स्मरन्नुपास्ते विषयान्समंतात् २० ॥

संसारगतिर्नित्यानेनाप्रसिद्धं ह्येतत् स्वात्मभूतं परमात्मानमनवगम्य विषयेषु प्रवर्त्तमानाः पराग्भूतास्तिर्य-
गादियोनिं प्राप्नुवंति तथा च वेदः चंद्रब्राह्मणे यानिमानि यावेताइमाः प्रजा इति वक्ष्यति च कामानुसारी पुरुष इति
कस्मात्तु नर्मिथ्यार्थयुक्तस्य गतिर्हि नित्येति तत्राह मिथ्यार्थयोगाभिहितांतरात्मा मिथ्याभूतविषयसंयोगेनाभि-
हितांतरात्मा ऽभिहितः स्वाभाविकेऽत्मभावः स्वानंदप्रवाहादिविषयान् तानेवोपात्तेन परमात्मानं समंतात्स्मं
ततः २०

स॰ सु॰ १

तर्हि केनोपायेन मृत्योर्विनाश इत्यत आह एवमिति एवं क्रोधादिरूपेण जायमानं प्रमादाख्यं मृत्युं जननमर
णादि सर्वानर्थबीजं विदित्वा क्रोधादीन् मृत्युदाहकान्दोषान्परित्यज्य क्रोधादीन्संपापघ्नज्ञानेन चित्सदा
नंदाद्वितीयब्रह्मात्मनावतिष्ठन्न बिभेति मृत्योः तथा च श्रुतिः आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चन
इति कस्मात्पुनर्ज्ञानेन तिष्ठन्न बिभेति मृत्योरित्यत आह विनश्यते तस्य ज्ञानिनो विषये गोचरे परमात्मनि
साक्षात्क्रियमाणे प्रमादाख्यो ज्ञानमृत्युर्विनष्टो भवति यथा मृत्युर्विषयसंसारमागतो मृत्युनाभिभूतो न
ष्टो भवति मर्त्यः स एवमात्मवेदिनो विषयमागतो ज्ञानमृत्युर्नष्टो भवति अयं च ज्ञानमहोदधौ ज्ञानसं
स्थानसद्भावो ज्ञानाग्निर्ज्ञानवज्रभूत मृत्युं हन्तीति विख्यातः सर्वोरावीतमत्सर इति २६ एवं तावत्क

एवं मृत्युं जायमानं विदित्वा ज्ञानेन तिष्ठन्न बिभेति मृत्योः विनश्यते विषये तस्य मृत्युर्मृत्योर्य
थाविषयं प्राप्य मर्त्यः २६ धृतराष्ट्र उवाच यानेवाहुरिज्यया साधुलोकान् द्विजातीनां पुण्यकृत
मान्सनातनान् तेषां परार्थं कथयन्तीह वेदा एतद्विद्वान्नेति कथं नु कर्म्म २७ ॥ राम ॥

मीरय इत्यादिना कर्मणां बंधहेतुत्वमुक्त्वा ज्ञानेन तिष्ठन्न बिभेति मृत्योरिति ज्ञानस्यैव मोक्षसाधनत्वमभिहितं
तत्र चोदयति धृतराष्ट्रः यानिति ननु कथं कर्मणां बंधहेतुत्वं यावता यानेवाहुरिज्यया ज्योतिष्टोमादिना
साधुलोकान्साधुभिर्धार्मिकैः [illegible] प्राप्यतमान् पवित्रान्सनातनान्नित्यान् तेषां ब्रह्मलोकपर्यन्ता
नां परार्थं परमपुरुषार्थत्वं कथ[illegible]स्मिन्संसारमंडले वेदाः एतल्लोकानां परमपुरुषार्थत्वं विद्वान्कथं
नु कर्मसाधनं नैति गच्छति नानुतिष्ठतीत्यर्थः अथवा एवं ब्रह्मलोकपर्यन्तानां साधनभूतं कर्म विद्व
न्ब्रह्मवित्कथं नैति नानुतिष्ठति २७ ॥

शिवं १

यथा आत्माभन्नत्वेन देहस्याप्रकाशोऽज्ञानं स्वरवा ...
नरकभूतत्वात्

कथं पुनरस्य देहस्य काम्यमानस्य हेयत्वमित्यत आह देहेति योऽयं भूतानां देहो दृश्यते स स्वप्रकाशात्मनः अविद्याक-
ल्प्यमानः केवलं नरकः श्लेष्मास्रकृमय विण्मूत्रमांसपूरिपूर्णत्वात् तथा चाह मनुः अस्थिस्थूणं स्नायुवद्धं मां-
सशोणितलेपनं चर्मावनद्धं दुर्गन्धिपूर्णं मूत्रपुरीषयोः जराशोकसमाविष्टं रोगायतनमातुरं रजस्वलमनित्यं
च भूतावासमिमं त्यजेत् इत्येवम्भूतं ... भक्ष्यं त्वाद्यदिहकमीय वृथाग्रंथं तोयमिकांक्षत एव धावंति गच्छंति
प्रभ्रमुन्मुखाः यथांधाकूपादिकं विवेक्तुमशक्ताः कूपादिषून्मुखाः पतंति एवं त्वादि प्राभिकांक्षंतो विषय
विषांधा उन्मुखाः पतंति नरके इत्यर्थः २४ यस्त्वेवं गृध्नंत एव धावंति तेषां देहो निरर्थक इत्याह अमन्यमा

देहाप्रकाशो भूतानां नरकोऽयं प्रदृश्यते गृध्नंत एव धावंति गच्छंति प्रभ्रमुन्मुखाः २४ अमन्यमानः क्षत्रियकं
चिदन्यं नाधीयते तीर्णेद्वास्ययाघ्रः क्रोधाल्लोभान्मोहभयांतरात्मा स वै मृत्युस्त्वच्छरीरे यएषः २५ ॥

न इति यस्त्वादिकमभिकांक्षन्धावति स विषयविषांधत्वादतिरिक्तं स्वात्मभूतं परमात्मानममन्यमानोऽप्रति
बुध्यमानो नाधीयते तद्विषयमध्यात्मशास्त्रं नाधिगच्छति तस्यास्य विषयविषांधस्य षडंगवेदविदुषोऽपि देहस्त्वि
णानिर्मितव्याघ्र इव निरर्थको भवति तथा चाह भगवान्वशिष्ठः चतुर्वेदोऽपि यो विप्रः सूक्ष्मं ब्रह्म न विंदति
वेदभारभराक्रांतः स वै ब्राह्मणगर्दभः न केवलं देहो निरर्थकः यएवं भूतः स एव मृत्युरित्याह क्रोधाल्लोभा
न्मोहभयांतरात्मा क्रोधलोभाभ्यां मोहभयसमन्वितः अंतरात्मा त्वच्छरीरे यो दृश्यते तवात्मा स एष मृत्युः
यः पुनरजितेंद्रियः क्रोधलोभादिसमन्वितो विषयेषु प्रवर्तते स एव मृत्युर्विनाशहेतुत्वात् उक्तं च आत्मै
व ह्यात्मनो बंधुरात्मैव रिपुरात्मन इति २५ ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥

स.सु.
८

एवं तावत्प्रमादात्मस्याज्ञानस्य मृत्युत्वम् अप्रमादस्य स्वरूपावस्थानलक्षणस्यामृतत्वं प्रमादं वै मृत्युमहं ब्रवी
मीत्यादिना दर्शयित्वा । अप्रमादेन निःसरतेन राज्ञो मित्यादिना सर्वमृत्युत्वे शरीरे एव इत्येतेन तस्यैव कोपि
त्मनापतितत्त्वस्य सर्वानर्थहेतुत्वं दर्शयित्वा कथमस्य मृत्योर्विनाश इत्याशंक्य एवं मृत्युं जायमानं विदित्वा ।
ज्ञानेन तिष्ठन्न बिभेतीह मृत्योरित्यात्मज्ञानेन मृत्युविनाशं दर्शयित्वा यानेवाहुरिज्ययेत्यादिना ब्रह्मलोका
देः पुरुषार्थत्वमाशंक्य एवं बुधविद्वान्नित्यादिनाते यामविद्यावद्विषयत्वेनापुरुषार्थमुक्त्वा परं परमात्मा
नं प्रयान्ति मार्गेणेति ज्ञानमार्गेण मोक्ष उपदिष्टः तत्र परं परमात्मानं प्रयान्तीति जीवपरयोरेकत्वमुक्तं
तदसहमानश्चोदयति धृतराष्ट्रः कोसाविति ननु यदि स एव सत्यादिलक्षणः परमात्मा क्रमेण का

धृतराष्ट्र उवाच कोसौ नियुंक्ते तमजं पुराणं स चैवेदं सर्वमनुक्रमेण किं चास्य ।।
कार्य्यमथवा सुखं च तन्मे विद्वान्ब्रूहि सर्वं यथावत् १९ ।। राम राम राम राम ।।

कोसौ तं सत्यादिलक्षणम
धायादिधरिं अनंतस्वज्ञानस्तु प्रविभूयान्न मयाद्यात्मना स्थितः संसरतीति चेत्
जं संसारे नियुंक्ते प्रेरयति किमन्येन स्वयमेव च किं चास्य नानायोनिषु प्रवर्तमानस्य कार्य्यं प्रयोजनं प्र।
यवा नानायोनिषु प्रवर्तमानस्य तत् दंभीभूतस्य स्वमहिम्नि स्थितस्य संसारानुप्रवेशे सुखमर्थं जातं किं वा।
भवति हे विद्वन्ब्रूहि सर्वं यथावत् तथा तद्वविदामेकः पुंडरीको भगवान्याज्ञवल्क्यः तत एव सर्वस्य स्व
त्वि मुक्तो तस्यैव जीवात्मत्वमप्युपगम्य यद्येवं स कथं ब्रह्मन् पापयोनिषु जायते ईश्वरश्च कथं भावे ।
इति कोः शंकाप्रयुज्यत इति कोसौ नियुंक्त इत्यनेन भगवतोक्तमेव ब्रह्मजीववादपक्षं वावदूकवाधं स्वयमेव
स्पष्टमुक्तवान् १९ ।।

गोव
न्दिः
८

एवंपृष्टः प्राह भगवान्सनत्सुजातः एवमिति सत्यमेव ब्रह्म ब्रह्मलोकादिसाध्यसुखं परमार्थमन्यमानो विष
यविमोधो विद्वानुपयाति तस्मिन्ब्रह्मलोकादिसाधनभूतेकर्मणि नविद्वान् प्रविद्यादिदोषदर्शी तथाच
बृहदारण्यके आनंदानामतेलोकाअंधेनतमसावृताः तांस्तेप्रेत्याभिगच्छंति अविद्वांसोऽबुधाजनाः
तथार्थजातंचप्रयोजनजातंच यत्तत्वविदुषोवदंतिवेदाः यस्मादविदुषएववदंतिनविदुषस्तस्मान्नेह
सविद्वान्ब्रह्मलोकाद्यनित्यसुखेतत्साधनेवाकर्मण्यायातिप्रवर्तते किंतर्हि कुरुतेपरमात्मानमात्म

है

सनत्सुजात उवाच एवंह्यविद्वानुपयातितत्रतथार्थजातंचवदंतिवेदाः सनेहैनेप्रा
याति परंपरात्माप्रयातिमार्गेणनिहंत्यमार्गान् २८ ॥ राम ॥ राम ॥ राम ॥ राम ॥

त्वेनावगम्यपरमात्मासन्ब्रह्मैवसन्परंप्रयाति मार्गेण ज्ञानेननिहंत्यमार्गान्संसारहेतुभूतानात्मनो
विरुद्धमार्गान्धर्माधर्मोपासनारूपान् अथवाएवंहि विद्वानुपयाति तत्रेतिपाठस्तस्मिन्पक्षेसविद्वान्
तत्रब्रह्मलोकादावुपासनफलमुपयातिप्राप्नोति तथार्थजातंचास्यवदंति वेदाः कीदृशंवदंति सनेह।
आयाति सविद्वान्निहास्मिंल्लोके कर्मीवनयातिनजायते किंतुमार्गेण ब्रह्मोपासनयाऽमार्गान्विरुद्धमार्गा
न्निहंति एवंतत्रहत्वाहेतून्संसारमार्गान्परमात्माब्रह्मात्मासन्कालेनपरंब्रह्मयातीत्यर्थः ॥ २८ ॥

सं०सु०
९

एवं तावदेकस्यैव परमात्मनोऽनादिमायायोगेन बहुरूपत्वं इदानीं यदीश्वरस्य कारणत्वं तदपि मायोपाधिकमित्याह य
एतद्वा इति यदेतद्वा परमार्थमतो भगवानैश्वर्यादिसमन्वितः स परमेश्वरो नित्यः विकारयोगेन ईक्षणादिपूर्वकं विश्वं
करोति न स्वयं तथा तच्छक्तिः देवात्मशक्तिर्मायैव करोति न परमात्मा असङ्गत्वादिलक्षणत्वात् इति स्म मन्यते न त्वेतच्चित
सदाद्वितीयस्य कारणत्वं किं तु मायावेशवशादित्यर्थः किं तर्हि स्मतथाभूतशक्तियोगे प्रमाणमिति चेत्तत्राह तथा
र्थे योगे तस्य परमात्मनो जगदुपादानभूतमायार्थे योगे च भवन्ति वेदाः तस्य मायासद्भावे वेदाः प्रमाणं भवन्तीत्यर्थः
तथा च श्रुतिः इन्द्रो मायाभिरिति तथा चाह भगवान् दैवी ह्येषा गुणमयीति २१ एवं तावत्तमादेवैमत्युमहं

य एतद्वा भगवान्स नित्यो विकारयोगेन करोति विश्वं तथा च तच्छक्तिरिति स्म मन्यते तथार्थे
योगे च भवन्ति वेदाः २१ धृतराष्ट्र उवाच यस्माद्धर्मानाचरन्तीह केचित्तथाधर्मान्केचिदिहा
चरन्ति धर्मः पापेन प्रतिहन्यते वा उताहो धर्मः प्रतिहन्ति पापं २२ ॥ राम ॥ राम राम ॥

२२

दुर्वीमीत्यादिना मृत्योः स्वरूपं तस्य कार्यं स्वात्मना व्याख्यानं तन्निमित्तं चानेकानर्थं दर्शयित्वा केन तद्धेतुर्विनाश इत्या
शंकय एवं मृत्युं जायमानमित्यादिना ज्ञानादेवाभयप्राप्तिं दर्शितां श्रुत्वा प्रासंगिके धर्माधर्मद्वयपरिहृते कर्मस्वभा
वपरिज्ञानाय प्राह धृतराष्ट्रः यस्माद्धर्मानग्निहोत्रादीनाचरन्तीह लोके केचित्तथाऽधर्मानाचरन्ति तेषां धर्मः पाप
न प्रतिहन्यते उताहोस्विद्धर्मः प्रतिहन्ति पापं अथवा तुल्यबलेनान्यतरेणान्यतरस्य विनाश इत्यविरुद्ध उभयो
रनुभवरोः नान्यतरेणान्यतरस्य विनाश इति विरुद्धः पुनरनयोरपि ज्ञानाग्निना विनाश इति २२ ॥ राम राम

धर्म
९

एवंपृष्टः प्राह भगवान् दोषइति यद्येवंचोद्यते एषोऽभिप्रायः नियोज्यनियोक्तृत्वादिभेददर्शनादेकस्य कूटस्थस्य
नेदं संभवादेवं न भवितव्यमिति तत्र यदि ब्रह्मण एव नानात्वमभ्युपगम्यते चेत्तदा तस्मिन्भेदयोगे ब्रह्मणो नानात्वयो
गे दोषो महान् को दोषः देवतिर्यङ्मनुष्यादिनो वैदिका भवेयुः वेदहृदयं पश्यामहे तं च बाधः स्यात् किंच नानारूपेण प
रिणतत्वात् ब्रह्मणोऽनित्यत्वादिदोषश्च स्यात् तादिकाय विरोधश्च प्रसज्येत अत्रोच्यते नास्माभिर्ब्रह्मणो नानात्वमभ्युपगम्यते
अपि तु जीवपरयोर्भेदोऽभ्युपगम्यत इति अनादिमहान्दोषो विनाशं प्राप्नोति श्रूयते यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरु
ते अथ तस्य भयं भवतीति अथ जीवपरयोर्भेदेऽभ्युपगम्यमाने तत्त्वमस्यहं ब्रह्मास्मि अयमात्मा ब्रह्मेत्यादि श्रुतिस्मृती
तिहासपुराणन्यायविरुद्धत्वात् अवैदिकं नाम महान्दोषो भवति कथं तर्हि त्वत्पक्षे जीवेश्वरादिव्यवहारभेदः कथं वा तेषां नित्यत्व
मित्यत्राह अनादियोगेन भवन्ति नित्याः अनादिरविद्या माया तथा चोक्तं प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि यत्साक्षादिति
च तद्योगेन अनादिमायायोगेन भवन्ति जीवादयो नित्याः अद्वितीयस्यापि परमात्मनो मायया बहुरूपत्वमुपपद्यत एवेत्यर्थः

सनत्सुजात उवाच दोषो महानत्र विभेदयोगे ह्यनादियोगेन भवन्ति नित्याः ॥
तथास्याधिक्यमुपैति किंचिदनादियोगेन भवन्ति पुंसः ॥ २० ॥ ॥

श्रूयते च एकस्य बहुरूपत्वं इन्द्रो मायाभिः पुरुरूप ईयते एको देवः एकं सद्विप्राः एकं सन्तं बहुधा एकः सन्बहुधावि
चचार त्वमेकोऽसि अजायमानो बहुधाभिजायते तथा च मोक्षधर्मे एक एव तु भूतात्मा भूते भूते व्यवस्थितः एकधा
बहुधा चैव दृश्यते जलचन्द्रवदिति तथा च याज्ञवल्क्यः आकाशमेकमिति तथा च कावषेयगीतासु न जायते म्रिय
ते वेति तथा चाह भगवान् अहमात्मा सर्वस्येति न चाप्ययं संसरति न च संसारयेत्प्रभुरिति किंच मायानिमित्तभेदे
ऽभ्युपगम्यमानेऽस्य परमात्मनः कार्यकारणात्मना व्यवस्थितस्याधिक्यमाधिपत्यं नोपैति किंचिदपि मायात्मकत्वात्
संसारस्य कूटस्थ एव भवतीत्यर्थः यस्मादेवं तस्मादनादियोगेन भवन्ति पुंसः पुमांसो जीवा बहवो भवन्ति अथवा
पुंसः पुरुषस्य सर्वस्य परमात्मनो माया अनादिसिद्धा तद्योगेन बहवो भवन्ति तथा चैतत्सर्वमनुगीतासु स्पष्टमाह
भगवान् इदं जगदनेकमिति वेदानुशासनं तथा चाह भगवान् पराशरः आत्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वं ज्ञान
स्वरूपमसत्यं तन्निमित्तं परमार्थत इति तथा चैतत्सर्वमाह भगवान्सनत्सुजातः ब्राह्मे पुराणे कावषेयगीतासु अस
ङ्गेन वेदान्पठध्वमिति २० ॥

स०सु०
२०

येषां धर्मेन च स्पर्द्धा तेषां तत्तज्ज्ञानसाधनमित्याह येषामिति येषां विषयपराणां स्वर्गादावुर्वश्यादिभोगश्रवणात्तत्सा
धनभूतज्योतिष्टोमादिधर्मे बुविस्पर्द्धा संघर्षो वर्तते अस्मादहमुत्कृष्टतमं धर्मं कृत्वा अस्मादपि सुखी भूयास-
मिति बलेबलवतामिव यथा बलवतो राज्ञो बलवत्तरराजानं दृष्ट्वा अहमस्मादपि बलवत्तां संपाद्य एनं जित्वा अस्मा
दपि सुखी भूयासमिति संघर्षो वर्तते तद्वदिति फलसंघर्षसहिता ब्राह्मणा यज्ञादिकारिणः इतः प्रेत्य धूमादिमा
र्गेण गत्वा स्वर्गं नक्षत्रादिरूपेण यान्ति प्राप्नुवन्ति प्रकाशात्मतां श्रूयते च अथ य इमे ग्राम इष्टापूर्ते दत्तमिति २५॥
येषां विषयानासक्त्यैव तस्मात्मनित्यफलसाधने ज्योतिष्टोमादौ धर्मे न च स्पर्द्धा न संघर्षो विद्यते तेषां फलनिरपे
क्षमाश्वार्थं कर्मानुतिष्ठतां तद्यज्ञादिकं कर्म शुद्धिद्वारेण ज्ञानसाधनं तथा च श्रुतिः तमेव वेदानुवचनेन ब्राह्म

20

येषां धर्मे बुविस्पर्द्धा बलेबलवतामिव। ते ब्राह्मणा इतः प्रेत्य स्वर्गं यान्ति प्रकाशात्मतां ॥ २५॥
येषां धर्मेन च स्पर्द्धा तेषां तज्ज्ञानसाधनं। ते ब्राह्मणा इतो मुक्ताः स्वर्गं यान्ति त्रिविष्टपं ॥ २६॥
तस्य सम्यक्समाचारमाहुर्वेदविदो जनाः। नैनं मन्येत भूयिष्ठं बाह्यमाभ्यन्तरं जनं ॥ २७॥

णा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति वक्ष्यति च भगवान् स्वयमेव शुद्धिद्वारेणैव ज्ञानसाधनत्वं पु
ण्येन पापं विनिहत्य पश्चात् संजायते ज्ञानं विरोधिता स्मेति ये यज्ञादिभिर्विशुद्धसत्वाः परमात्मानमात्मत्वेनावगच्छ
न्ति ते ब्राह्मणा इतोऽस्मात्कार्यकारणात्मकाल्लोकात् प्रमुक्ताः स्वर्गं सुखैकरूपमानन्दं ब्रह्म यान्ति इतरस्य स्वर्गादस्य
वैलक्षण्यमाह त्रिविष्टपमिति अथ वेते त्रिभिर्विष्टं प्रविष्टमधिकारिणं यातीति त्रिविष्टपं २६ इदानीं विदुषः स
२५ माचारमाह तस्येति तस्य विदुषः सम्यक्समाचारमाहुर्वेदविदो जनाः नैनं योगिनं मन्येत भूयिष्ठं [illegible] बहु
बाह्यमाभ्यन्तरं जनं पुत्रकलत्राद्याभ्यन्तरं जनं मित्रादि बाह्यं तथा पुत्रमित्रादयोऽपि नानुसरन्ति तेषामगोचर एव वर्तते [illegible]
तदित्यर्थः २७॥
२०

एवं पृष्टः प्राह भगवान् यस्मिन्निति यस्मिन् पुण्यापुण्यात्मके कर्मणि स्थितोऽपि कुर्वन्नप्युभयं पुण्यापुण्यलक्षणं क-
र्मेति यन्नियमेन विद्वान् ज्ञानेन प्रतिहंति विनाशयति कथमेतदवगम्यते ज्ञानेन विद्वान् प्रतिहंतीति तत्राह सिद्धं प्र-
सिद्धं श्रुतिस्मृतीतिहासपुराणेषु तथा च श्रुतिः भिद्यते हृदयग्रंथिरित्यादि तद्यथा पुष्करपलाश इति यथैषी-
कातूलमग्नौ विन्यास्तिष्ठ यथैधांसि समिद्धोऽग्निरिति क्षणमात्मानुसंधानात् पापं दहतीति कोटिशः अन्यथा पापवि-
ध्वंसो न भवेत् कोटिपुण्यतः अन्यथा ज्ञानहीनस्य तत् पुण्यमुपैति तथागतं पापमुपैति तत्फलं चोपभुंक्ते कथमेतद-
वगम्यत इति चेन्न दृष्टं श्रुतिस्मृतीतिहासपुराणेषु प्रसिद्धं तथा च श्रुतिः इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयोऽभिनं-
दंति मूढाः नाकस्य पृष्ठे सुकृते ते नंतेनभूत्वेमं लोकं पुनरेवा विशंतीति अनंदा नाम ते लोका अंधेन तमसावृताः तै

सनत्सुजात उवाच यस्मिन् स्थितो वाप्युभयं हिनस्ति ज्ञानेन विद्वान् प्रतिहंति सिद्धं तथास्य यथा पुण्य ॥
मुपैति देही तथागतं पापमुपैति सिद्धं २३ गत्वोभयं कर्मणा भुज्यतेऽस्थिरं शुभस्य पापस्य स चा।
पिकर्मणो धर्मेण पापं प्रणुदतीह विद्वान् धर्मो बलीयानिति तस्य विद्धि २४ ॥ राम ॥

विद्यामामिति च २२ किं च विदुषः अनुभवत एव उभयोरन्यतरेण न्यायतरस्य विनाश इति तत्राह गत्वेति गत्वा पर-
लोकं प्राप्य उभयं पुण्यापुण्यसाध्यं फलं पुण्यापुण्यलक्षणेन कर्मणा भुज्यते अस्थिरं तथा च श्रुतिः यथेह कर्म-
जितो लोकः क्षीयत इति श्रूयते च बृहदारण्यके यो वा एतदक्षरमिति अन्यथेऽन्यथातो विदुरिति च छांदोग्ये स चापि
सोऽपि विद्वान् धर्मेण कर्मणा पापं प्रणुदति विनाशयति तथा च स्मर्यते धर्मेण पापमपनुदति इह लोके विद्वान्
वक्ष्यमाणलक्षणेन ईश्वरार्थकर्मानुष्ठानात् तस्य धर्मो बलीयानिति विद्धि जानीहि ईश्वरार्पितत्वात् तथा च वक्ष्य-
ति तदर्थमुक्तं तप एतदिज्याताभ्यामसौ पुण्यमुपैति विद्वान् पुण्येन पापं विनिहत्य पश्चात् स जायते ज्ञानविदीपिता-
त्मा ज्ञानेन चात्मानमुपैति विद्वान् अथान्यथा स्वर्गफलानुकांक्षी अस्मिन् कृतं तत्परिगृह्य सर्वममुत्र भुंक्ते
पुनरेति मार्गमिति २४

तथाच श्रुतिः कुटुंबं पुत्रदारांश्च वेदांगानि च सर्वशः यज्ञं यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनिः तथाचाह वशिष्ठः यं न संतं ३ नु २

स०सु० पुनरपि तस्यैव समाचारमाह नित्यमिति नित्यं नियमेन अज्ञातचर्यो गूढचर्यो मे मम कर्त्तव्येति मन्येत ब्राह्मणो ब्रह्मवित् ज्ञातीनां ज्ञातिपुत्रादिप्रभृतीनां मध्ये सन्निधौ वसन्नैव विद्येत न प्रख्यापयेत किंचनाकिंचिदपि कर्मादि किंचिते योगानैव विद्येत नचासंतं नाशुभं न बहुश्रुतमिति जानन्तु विद्धि मे धावी जडवल्लोकमाचरेत् अथवा नित्यमज्ञातचर्यो ज्ञातेच सुराद्यविषयभूते वाचामगोचरे अनुद्दिष्टानेत्तमितरानात्मना वस्थिते अशनायाद्यसंस्पृष्टे पूर्णानंदस्वरूपे सर्वांते प्रत्यगात्मनि ब्रह्मणि चर्या निष्ठा समाधिलक्षणा मे मम कर्त्तव्यान पराग्भूते देहेंद्रियपुत्रमित्रकलत्रादौ स्थूलोहं कृशोहं ब्राह्मणोहं क्षत्रियोहमित्येवमात्मिकाकर्त्तव्येति मन्येत स ब्राह्मणो ब्रह्मवित् तथाच श्रुतिः यच्चक्षुषा न पश्यतीति यस्मादेवं तस्मादज्ञात एव ब्रह्मनिष्ठा कर्त्तव्या तस्मात्क्रोधमानादयो

२२

नित्यमज्ञातचर्यो मे इति मन्येत ब्राह्मणः ज्ञातीनां तु वसन्मध्ये नैव विद्येत किंचन २२

व=

को ह्येनं मंतरात्मानं ब्राह्मणो मंतुमर्हति निर्लिंगमचलं शुद्धं सर्वद्वंद्वविवर्जितं ॥ २२

२ नित्यविषयाणींद्रियाणि च ज्ञातयश्च समाख्याता देहिनस्तद्दर्शिनः इंद्रियादीनां ज्ञातिशब्देनोक्तत्वात् ज्ञातीनामिंद्रियाणां मध्ये वसन्नपि अयमहमेव नश्यरा न जिघ्रन्निति मन्यमानो विजानन्नपि नैव मात्मादिरूपेण विद्येत किंचिदपि प्रतिपद्येत तत्साक्षित्वादात्मनः तथाच श्रुतिः अथ यो वेदेदं जिघ्राणीति स आत्मेति देहरूपतरु मौन्यात्मत्वेन गृह्णीयादित्यर्थः २१ कस्मात्पुनरेवं न गृह्णीतेत्यत्राह को हीति को हि निर्लिंगं सूक्ष्ममचलं क्रियाकर्तादिशून्यं शुद्धमविद्यादिदोषरहितं सर्वद्वंद्वविवर्जितं मंतरात्मानं प्रमात्रादिसाक्षिणमनात्मविषयभूतं एवमुक्तेन प्रकारेण देहद्वयतद्धर्मैस्तयोः स्थूलोहं कृशोहं न गच्छामि न पश्यामि मूको बधिरः काणः सुख्यहं दुःख्यहमिति ब्राह्मणः सन्मंतुमर्हति तथाच सति ब्राह्मण एव मे वहीये ते स्यार्थः वक्ष्यति च य एवं सत्यान्नापि जिसत्ते यो ब्राह्मणस्त्वयेति ३२॥

कीदृशे देशे स्थवास इत्यत आह यत्रेति यत्र यस्मिन्देशे म्लेच्छचौरादिपीडारहिते अन्नपानादि भूयिष्ठं बहुलं वर्त्त
ते इति मन्येत यथा प्रावृषि वर्षाकाले उदकं बहुलं भवति तद्वत् तल्लोलुपमिति केचित् तल्
लोलुप इति विख्यातो मुनिभोज्यान्नादि स्थितिं वदन्ति इत्थं विशेषयन्ति केचित् तत्र स्थितस्तदन्नपानादिकमुप
जीवन्नानुसंज्वरेत् संतप्तो न भवेत् अन्यथान्नपानादिरहिते देशे कथं नाम दृढयात्रासिद्धिरिति संतप्तो भवति तेन
श्र[illegible]नयोगसिद्धिः २८ तत्राप्येवंविधिजनसमीपवास इत्याह यत्रेति यत्र यस्मिन्देशे प्रकथयमानस्य तत्त्वं स्वीभूत
स्य स्वमाहात्म्यं प्रख्योदयतो येन केनचिदाच्छिन्नस्य येन केनचिदाच्छिन्नस्य यत्र देशे यज्ञशायिनः आत्मानमिव लोकं पश्य
तो जड इव लोके माचरतः प्रयच्छत्याशीच भयं जडे इति मत्वा पूर्ववत्कल्याणमवमानादिकं प्रयच्छति तथा तिरस्कृतमिवाऽ
कुर्वन् यथा कश्चित्स्थितप्रज्ञलक्षणो ब्रह्मविदिति मत्वा प्राणिपातादि[illegible]पूर्वकमीश्वरबुद्ध्या संपूजयति तद्वद्दत्तान्

यत्र मन्येत भूयिष्ठं प्रावृषीव जलोदकं। अन्नपानं च यत्र स्यात्तत्र जीवन्नानुसंज्वरेत् २८ यत्राकथयमानस्य प्रयच्छ
त्यशिवं भयं अतिरिक्तमिवाकुर्वन्स श्रेयान्नेतरो जनः २९ यो वाऽकथयमानस्य ह्यात्मानं नानुसंज्वरेत् ब्रह्म
स्वं नोपहन्याद्वा तदन्नं संमतं सताम् ॥ ३० ॥

॥ तथातिरिक्तं ब्राह्मणजातिमात्रप्रयुक्तपूजातिरिक्तं पूजोत्तरं ब्रह्मवि
दस्तु रूपमकुर्वन्नवमानादिकमेव कुर्वन् यो जनः सोऽस्मविदुषः श्रेयान्नेतरः यः प्राणिपातादिपूर्वकमीश्वरबुद्ध्या पू
जयति तथाह मनुः सन्मानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव। तथा चाह पाराशरः सन्मानात्परमाहानिर्नो
न्यान्विद्युतानेमते जनेन च मतो योगी योगसिद्धिं न विंदति २९ कीदृशस्य तर्ह्यन्नं भोज्यमित्यत्राह यो वाऽइति यो वा
ऽकथयमानस्य तत्त्वं स्वीभूतस्य सर्वोपसंहारं कृत्वा पूर्णात्मनावस्थितस्यात्मानं नानुसंज्वरेत् न तापयेत् ब्रह्म
स्वं नोपहन्याद्वा ब्रह्मनिष्ठासाधनभूतं चैलाजिनपुस्तकादिकं नापहरेद्वा तथा चोक्तं इत्तरेमारिकं नाश्च्यो
गिनः संप्रचक्षते कुशवल्कलचैलादि ब्रह्मस्वं योगिनो विदुः अन्यदेपि ब्रह्मस्वं नोपहन्याद्वा तदन्नं तस्यान्नं संम
तं सतां भोज्यत्वेन ३० ॥

स० सु०
१२

विशु कुर्वन्स्विष्टकृत्। किंच ब्रह्मविन्महिमेवः सर्वोनिति सर्वानग्न्यादीन् स्विष्टकृतः सुहुरुं कुर्वतीति तथा च श्रुतिः। विशेन त्रिसविदि देवाः ब्रह्मत्वेन मुहि एतस्या गाथे विद्याद्य इहकश्चन सर्वदेवतायाज्यो विप्रो ब्राह्मणस्य न समानो ब्राह्मणेन ब्रह्मविदि त्रि देवास्त्वेन मुहि एतस्या गाथे विद्या य इह कश्चन सर्वदेवतायाज्यो हविष उद्दिश्य त्यागेन फलार्थं प्रयतते स्वयं न समान इत्यर्थः। नैतदाश्चर्यं यस्मिन्देवता विप्राये हविष उद्दिश्य त्यागेन फलार्थं प्रयतते स्वयं यजमान इदमग्नये इदमिंद्रायेति सो पि हविः प्रतियोगी देवता विप्रो न समानो ब्रह्मविदा किं पुनर्वक्तव्यं देव यजमान इदमग्नये इदमिंद्रायेति सो पि हविः प्रतियोगी ब्राह्मणस्य न साम्यं लभते सो पि किं पुनः इज्यते येन मंत्रेण य वद्भ्युर्यजमानो न समम् इति तथा च मोक्षधर्मे ब्राह्मणस्य न साम्यं लभते सो पि किं पुनः परं भूतं न किंचिदिति ३७ पुनरपि तस्यैव समाचारमाह जमानो द्विजोत्तम इति तथा चाह मनुः ब्रह्मविद्भ्यः परं भूतं न किंचिदिति ३७ पुनरपि तस्यैव समाचारमाह यमिति यं ब्रह्मविदं मन्यमानं तल्लीभूतं सर्वोपसंहारं कृत्वा स्वे महिम्नि व्यवस्थितं गुरुरुच्चारणं केचिद्वि

सर्वो ऽन्विष्टो देवान् विद्याद्य इह कश्चन न समानो ब्राह्मणस्य यस्मिन्प्रयतते स्वयं ३७
यमप्रयतमानं तु मानयन्ति स मानितः न मन्यमानो मन्येत नावमानेन संज्वरेत् ३८
लोकस्वभाववृत्तिर्हि निमेषोन्मेषवत्सदा विद्वांसो मानयन्तीह इति मन्येत मानितः ३९
अधर्मविदुषो मूढा लोकशास्त्रविवर्जिताः न मान्यं मानयिष्यन्ति एवं मन्येदमानितः ४०

यमसः स्थितप्रज्ञलक्षणेन ब्रह्मविदिति ज्ञात्वा मानयन्ति चेत्स तैर्मानितः पूजितो विद्वान्मन्यमानो हमिति न मन्येत तथा स्थितप्रज्ञलक्षणेन मिराज इति मत्वा ऽवमानं कुर्वन्ति चेत्तस्मिन्नवमानेन निमित्तेनानुसंज्वरेत् न्येत तथा स्थितप्रज्ञलक्षणेन न मिराजड इति मत्वा ऽवमानं कुर्वन्ति चेत्तस्मिन्नवमानेन निमित्तेनानुसंज्वरेत् नानुतप्येत ३८ किं तर्हि मानितेना ऽवमानितेन वा मंतव्यमित्यत्राह लोकस्वभाव इति लोकस्य यद्वृत्तं विद्व सो ब्रह्मविदं मानयन्ति तथा निमेषोन्मे लोकस्वभाववृत्तिरिति स्वाभाविकी वृत्तिरित्येवं मन्येत ३९ तथा अध धर्मविदुषो मूढा विवेकहीनाः लोकशास्त्रविवर्जिताः इति अमानितो जनैरवज्ञातो द्विजो नैवं मन्येत अधर्मविदुषो मूढा विवेकहीनाः लोकशास्त्रविवर्जिताः न मान्यं माम् इह मानयिष्यन्ति अमान्यानपि मानयिष्यंतीत्येतत्तद्विदुषां स्वभाव इति मन्येतामानितः पूजितो विद्वान्

६०

यस्त्वेवमनुतिसपापीयानित्याह योन्यथेति योन्यथा सन्तं निर्लिंगमचलं भुद्धं सर्वद्वंद्वविवर्जितं चित्सदानंदब्रह्मात्मना सं
तं स्वात्मानमन्यथा देहद्वयतद्धर्मात्मतया कर्त्ता भोक्ता सुखी दुःखी कृशः स्थूलो मूर्खः पुत्री स्यनष्टा ब्राह्मणोहमित्येवमा
त्मानं प्रतिपद्यते किं तेन मूर्खेण नात्मविदा आत्मचौरेण आत्मापहारिणा न कृतं पापं महापातकादिकं तेन सर्वं तेन कृ
तमित्यर्थः तथा च श्रुतिः असुर्या इति आत्महनप्राप्यलोकेस्मिन्नरके चिरं भवेदिति स्मृतिः तस्माद्विषयभूतदेहद्व
यादिस्वात्मभावं परित्यज्य ज्ञानदत्वा गोगोचरे परमात्मनि निष्ठा कर्तव्येत्यर्थः ३३ अन्यथा देहद्वयमिंद्रियादि
तद्धर्माननुपादयतः किं भवतीत्यत आह अश्रांत इति योनात्मभूतदेहेंद्रियतद्धर्मानात्मत्वेन नोपादत्ते स पुरुषो अश्रांतः
स्यात् संसारश्रमयुक्तो न भवेत् अशनायापिपासादेर्देहादिधर्मत्वात् तथा च श्रुतिः अशनायापिपासे प्राणस्येति
देहद्वयाध्यासेन तद्धर्माध्यासो भवति य एवमश्रांतस्तस्य नोपद्रवो भवति क्रोधलोभभयहर्षादयो भूतदेहीया यो

योन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते किं तेन न कृतं पापं चौरेणात्मापहारिणा ३३ अश्रांतः स्यादनादानात्संम
तो निरुपद्रवः शिष्टो न विवृतस्स स्याद्ब्राह्मणो ब्रह्मवित्कविः ३४ येयथा वांतमश्नंति श्वाला नित्यमभूतये एवं ते वांतमश्नं
ति स्ववीर्यस्योपभोजनात् ३५ अनाढ्या मानुषे वित्ते आढ्या वेदेषु ये द्विजाः ते दुर्धर्षा दुःप्रकंप्या विद्यात्तान्ब्रह्मणस्तनुं ३६॥

गंतारो ये उपद्रवास्तद्धीनो निरुपद्रवः संमतो विद्वद्भिः शिष्टत्वेन संमतः शिष्टवन्नस्यान्नाचेष्टोऽडवच्चरेत् ब्राह्मणो ब्रह्म
५२ वित्कविः ३४ इदानीमग्रहचारिणं कुत्सन्नाह येयथेति मूढाः श्वाला इति प्रोक्ताः श्वा च श्वाला इति दर्शनात् यथा श्वा
नो वान्तं हावा वांतमुच्छिष्टमश्नंति एवं ये शिष्टा ब्रह्मचारिणः स्वमाहात्म्यं व्यापयंतः अग्रहचारिणो वर्त्तन्ते ते वां
तमुच्छिष्टमश्नंति स्ववीर्यस्योपभोजनात् यदिदं वांताशनं तदभूतये अनर्थायैवेत्यर्थः तस्माद्गृहः सन्नशिष्ट
वद्व्रतं समाचरेदिति ३५ इदानीं योगिनः प्रशंसन्नाह अनाढ्या इति अनाढ्याः अवहुमता अप्रौढा आत्मानो मा
नुषे वित्ते आप्यपुत्रवित्तादिषु आढ्या वेदेषु वेदप्रतिपाद्या अहिंसासत्यास्तेयब्रह्मचर्यप्रमादिसाधनेषु ये द्विजाः
ते दुर्धर्षा दुःप्रकंप्या विद्यात्तान् ब्रह्मणस्तनुं ब्रह्मस्वरूपभूतान् विद्यादित्यर्थः ॥ ३६ ॥ राम ॥ रामराम।

स॰सु॰
२३

ॐ ॥ अथ यं मनस्येत्यादिना मौनमाहात्म्यं प्रदर्शितं तच्छ्रुत्वा आह धृतराष्ट्रः कस्येति कस्य कीदृशस्य एष पूर्वोक्तो भावाद्युपरमल
क्षणो मौनो भवति कतरन्नु एतयोः संभाषणलक्षणरूपयोर्मौनं प्रब्रूहि हे विद्वन्निह मौनभावं मौनेन तद्रूपी
भावेन विद्वानुत याति मौनं ब्रह्म स्वाहो स्वित् कथं मौनमिहाचरंति १ एवं पृष्टः आह भगवान् यत इति यतो यः
स्माद्वेदा मनसा सहैनं परमात्मानं नानुप्रविशंति तथा च श्रुतिः यतो वाचो निवर्तंते अप्राप्य मनसा सहेति ततः तस्मा
देव कारणात् स एव वाचामगोचरः परमात्मा मौनं यद्येवं किंलक्षणस्तर्हि परमात्मा तत्राह यत्रोत्थितो वेदशब्दः
यस्मिन्नर्थे निमित्तभूते समुत्थितो वेदशब्दः शास्त्रादिकारणं ब्रह्मेत्यर्थः अथवा यस्मिन् संवेदनाख्ये उत्थितो
वाचकत्वेन प्रवृत्तो वेदशब्द इत्यर्थः तथा वेदशब्दप्रतिपाद्यः संविद्रूपोयं परमात्मा यद्वि वाचामगोचरः परमा

धृतराष्ट्र उवाच कस्यैष मौनः कतरन्नु मौनं प्रब्रूहि विद्वन्निह मौनभावं मौनेन विद्वानुत याति मौनं क
थं मुने मौनमिहाचरंति १ सनत्सुजात उवाच यतो न वेदा मनसा सहैनमनुप्रविशंति ततोथ मौनं य
त्रोत्थितो वेदशब्दस्तथायं स तन्मयत्वेन विभाति राजन् २ धृतराष्ट्र उवाच ऋचो यजूंष्यधीते यः सा
मवेदं च यो द्विजः पापानि कुर्वन्पापेन लिप्यते किं न लिप्यते ३ सनत्सुजात उवाच नैनं सामा
न्यृचो वापि यजूंषि च विचक्षण: त्रायंते कर्मणः पापान्न ते मिथ्या ब्रवीम्यहं ४ ॥ रामराम॥

त्मा कथमेतदवगम्यते संविद्रूपं परमात्मेति तत्राह स परमात्मा तन्मयत्वेन ज्योतिर्मयत्वेनैवास्माकं विभा
ति राजन्नेवमेवास्मदनुभवो नान्यत्र विश्वासः कर्तव्य इत्यर्थः अथवा श्रुतिस्मृतीतिहासपुराणादिषु ज्यो
तिर्मयत्वेन प्रतीयते तथा च श्रुतिः तद्देवा ज्योतिषां ज्योतिरिति २ इदानीं वेदस्वभावपरिज्ञानाय प्राह धृतरा
ष्ट्रः ऋगिति यः पापानि कुर्वन् ऋग्वेदादिकमधीते स तेन वेदाध्ययनेन पूयते न वा एतद्ब्रूहि महर्षे इत्यभिप्रायः
३ एवं पृष्टः आह भगवान् नेति यः पापानि कुर्वन् ऋग्वेदादिकमधीते नैनं प्रविद्यावारितं ऋग्वेदादयो वेदाः
पापात्कर्मणस्त्रायंते न रक्षंतीति न ते मिथ्या ब्रवीम्यहं एवमेतन्नान्यत्र विश्वासः कर्तव्य इत्यर्थः ५ ॥ राम ॥

२४

दानीं मानमौनयोर्भिन्नविषयत्वमाह नैवेति नैव मानं मौनं मौनं च सहितौ वेकत्र वसतः सदा अयं हि प्रत्यक्षग्रा
गोचरो लोको लोक्यत इति लोकः प्रपंचो मानस्य विषयः असौ परलोको मौनस्य को सौ तद्विदुः तथा चाह भग
वान् ज्ञानस्य दृति निर्देशो ब्रह्मणो दृति तथा चानुगीतासु ज्ञानस्य छिद्रमेव चेति सायुज्यानि पदानि वेशतीति तच्छब्द
वाच्यं ब्रह्म मानस्याविषय इत्यर्थः [illegible] भवति मानात्संसारप्राप्तिः मौनेन ब्रह्मप्राप्तिरिति उक्तं च हैरण्यग
र्भे अन्नपानादिभोगेषु भावो मान इति स्मृतः ब्रह्मानंदसुखप्राप्तिहेतुर्मौनमिति स्मृतः ॥ ४१ इदानीं मानार्थसंवासे
अपवर्गो भावस्वरूपीयति श्रीर्हीति हे क्षत्रिय श्रीर्हि नामार्थसंवासाद्विषयसंवासात् मानगोचरे प्रपंचे वर्त्तमानस्य
स्वर्गपश्वन्नादिसाधनभूतं कर्मानुतिष्ठतः श्रीर्हि भवति सा चापि श्रीः परिपंथिनी श्रेयोमार्गविरोधिनी तथा च मो
क्षधर्मे निबंधिनी रज्जुरेषेति [illegible] प्रतिबद्धो मूढः सन्विषयेषु प्रवर्त्तते तेन विद्याविहीनेन ब्राह्मी ब्रह्मानं

नैव मानं च मौनं च सहितौ वसतः सदा अयं मानस्य विषयो ह्यसौ मौनस्य तद्विदुः ॥ ४१ श्रीर्हि मा
नार्थसंवासात् सा चापि परिपंथिनी ब्राह्मी सुदुर्लभा श्रीर्हि विद्याहीनेन क्षत्रिय ॥ ४२ द्वारा
णि सम्यक् प्रवदंति संतो बहुप्रकाराणि दुराचराणि सत्यार्जवे ह्रीर्दमशौचविद्याः षण्मानमोहप्र
तिबंधकानि ॥ ४३ इति श्रीसनत्सुजाते प्रथमोऽध्यायः २ समाप्तः ॥ रामे ॥ रामे ॥

दलक्षणा श्रीः तथा हैरण्यगर्भे यानित्या चिद्घनानंदा गुणरूपविवर्जिता आनंदाख्या परा भूजा ब्राह्मी श्रीरिति कथ्य
ते सा च दुर्लभा श्रवणेनापि न शक्या तथा च श्रुतिः श्रवणयापि बहुभिर्यो न लभ्यः शृण्वंतोपि बहवो यं न विदुः आ
श्चर्यो वक्ता कुशलोस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्ट इति ॥ ४२ इदानीं ब्रह्मलक्ष्मीप्रवेशद्वाराणि दर्शयति द्वा
राणीति द्वाराणि ब्रह्मलक्ष्मीप्रवेशद्वाराणि संतः सम्यक् प्रवदंति दुराचराणि दुःखाचराणि कानि तानि सत्यं य
थार्थभाषणं भूतहितं च आर्जवमकौटिल्यं ह्रीरकार्यकरणे लज्जा दमः अंतःकरणोपरतिः वहिःकरणोपरति
रिति केचित् शौचं मलकल्मषप्रक्षालनं विद्या ब्रह्मविद्या षडेतानि मानमोहप्रतिबंधकानि ॥ ४३ ॥
इति श्रीशंकरभगवत्कृतः सनत्सुजातीयभाष्ये प्रथमोऽध्यायः २ ॥ रामे ॥ ॥ राम ॥ ॥ राम ॥

साधनत्वेन यज्ञदानादीन्दर्शयति वेदः तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशके-
नेति तस्मात्तदर्थत्वेनैव यज्ञादीनां पुरुषार्थत्वं एतस्य तु स्वर्गादेः श्येनेनाभिचारादीनां चाऽपुरुषार्थत्वं संसारा-
नर्थहेतुत्वात् तथा च श्रुतिः प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म एतच्छ्रेयो येऽभिनन्दन्ति मूढा।
जरामृत्युं ते पुनरेवापि यन्ति यस्मादेवं मोक्षतत्साधनप्रतिपादकत्वेन संसारानर्थनिवृत्तिहेतुत्वं वेदानां तस्माद्वेदा
वेदविदं त्रातुं प्राप्ता एवेत्येतत्सर्वमभिप्रेत्याह भगवान् तस्येत्यादिना श्लोकत्रयेण तत्र प्रथमेन परमपुरुषार्थं
परमानन्दं दर्शयति तस्यैव परमात्मनो मायाकल्पितेन नामादिविशेषमत्त्वेऽपि रिदं जगद्भाति हे महानुभाव कथमेत-
दवगम्यते तस्यैव नामादिविशेषमत्त्वेऽपि रिदं जगद्भातीति इन्द्रो मायाभिः पुरुरूप ईयत इति मायानिमित्तं बहुरूपं नि-
र्दिशन् तस्यैव सम्यग्रूपं तदेतद्ब्रह्मापूर्वमनपरमनन्तरमित्यादिना प्रवदन्ति वेदाः [illegible]
[illegible] द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं चेत्या-
दिना तस्यैव मूर्तामूर्तात्मकं जगत्स्वरूपं निर्दिशन् सम्यग्रूपं नेति नेतीत्यादिना प्रवदन्ति वेदाः तथा आत्म-
न आकाशः संभूत इति वियदादिधरित्र्यन्तं तस्यैव कार्यं निर्दिशन् आकाशोपन्यासमुखेन तस्यैव सम्य-
ग्रूपं यतो वाचो निवर्तन्ते इत्यादिना प्रवदन्ति वेदाः तथा स्वधामहि भगवदित्यादिना नामादिप्राणान्तं
जगन्निर्दिशन् यत्र नान्यत्पश्यतीत्यादिना तस्यैव सम्यग्रूपं भूमानं तमसः परं स्वमहिम्नि व्यवस्थि-
तं प्रवदन्ति वेदाः न केवलं वेदा ऋषयो मुनयोऽपि तद्ब्रह्म विश्ववैरूप्यं विश्वरूपविपरीतरूपमुदाहरं-
ति तथा चाह भगवान् पराशरः प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरं वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्म-
संज्ञितमिति तद्विष्णोः परं रूपमरूपाख्यमनुत्तमं विश्वरूपवैरूप्यलक्षणं परमात्मन इति च ॥७॥

ज ७

24

किं कुर्वंतीति चेत्तत्राह न छंदांसीति छंदांस्येनं वृजिनं धर्मेनात्तिकं पापकारिणं अधीतवेदमधीतवेदार्थं मायाविनं ध
र्मध्वजं मायया वर्त्तमानं मिथ्याचारिणं तेन तारयंति न रक्षंति किं करिष्यंतीति चेद्यथा पक्षिणो जातपक्षाः
नीडं स्थानं त्यजंति एवं छंदांस्यंतकाले मरणकाले प्रजहति त्यजंति ५ एवमुक्तः प्राह धृतराष्ट्रः नचेदिति॥
कर्मोदय इत्यादिना निःस्थानां काम्यानां चापततलोकादिप्राप्तिहेतुत्वेन संसारार्थहेतुत्वस्य दर्शितत्वात् प्रतिषिद्ध
रूपकर्मणो नरकहेतुत्वेनानर्थहेतुत्वस्य च दर्शितत्वात् न वेदा वेदविदं त्रातुं शक्ताश्चेदयं कस्मादितः प्रलापः
वेदाध्ययनादिरूपः अनर्थहेतुत्वेन वेदाध्ययनतदर्थविचारतदर्थानुष्ठाना निवर्त्तव्या नीत्यर्थः ६ भवेदप्य
वं यदि घोषणं वेदार्थः स्यात् अन्य एव स्वर्गादेः परमपुरुषार्थो मोक्षाख्यो वेदार्थः इतरस्य कर्मराशेरुपासना
याश्च तत्प्राप्तिसाधनज्ञानसाधनांतःकरणशुद्धिसाधनत्वेन परंपर्येण पुरुषार्थत्वादेव वेदप्रतिपाद्यत्वं तथा

नछंदांसि वृजिनं तारयंति मायाविनं मायया वर्त्तमानं छंदांस्येनं प्रजहत्यंतकाले नीडं शकुं
ताइव जातपक्षाः ५ धृतराष्ट्र उवाच नचेद्वेदा वेदविदं त्रातुं शक्ता विचक्षण अथ कस्मा
त्प्रलापोयं ब्राह्मणानां सनातनः ६ सनत्सुजात उवाच तस्यैव नामादिविशेषरूपै
रिदं जगद्भाति महानुभाव निर्दिश्य सम्यक्प्रवदंति वेदास्तद्विश्ववैरूप्यमुदाहरंति ७॥

हि तमेव परमानंदं परमपुरुषार्थं दर्शयन्वेदः अनंदा नाम ते लोका अंधेन तमसावृताः तांस्ते प्रेत्या
भिगच्छंति अविद्वांसोऽबुधा जना इति स्वर्गादिलोकानामपुरुषार्थत्वमनानंदात्मकत्वमविद्याविषयत्वेन द
र्शयित्वा आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदिति आत्म
न४ विदः कृतार्थत्वं दर्शयित्वा इहैव संतस्तद्विद्वामो नचेदवेदीर्महती विनष्टिः य एतद्विदुरमृतास्ते भवंति अ
थेतरे दुःखमेवापियंतीत्यात्मविदाममृतत्वप्राप्तिमनात्मविदामात्मविनाशमनर्थप्राप्तिं च दर्शयित्वा य
देनमनुपश्यत्यात्मानं देवमंजसा ईशानं भूतभव्यस्य न ततो विजुगुप्सत इत्यादिभिर्वाक्यैस्तत्स्वरूपं तद्दर्श
नेन तत्फलानि भूयो भूयो दर्शयित्वा कथमेनं रागादिभिरितस्ततः कृष्यमाणं विषयाभिभूतं मोक्षयित्वा पर
मपदे परमात्मनि पूर्णानंदे स्वाराज्ये मोक्षाख्ये स्थापयिष्यामीति मत्वा तत्प्राप्तिसाधनज्ञानसाधनविविदिषा

सन्सु॰ २५

एवं पृष्टः प्राह भगवान् निष्कल्मषमिति यदेतन्निष्कल्मषं तपस्तत्केवलं परिचक्षते केवलं बीजमित्युक्तं सर्वस्य प्रपंचस्य
बीजं निमित्तं यत्तत्केवलं किमित्युक्तं प्राहुरुद्धाना गुणसाम्ये स्थितं तत्त्वं केवलमिति कथ्यते केवलो देवदत्त इति जगत्सदसदा
त्मकमिति तदेवं केवलं तपः समृद्धमप्यृद्धं भवति नान्यथा यदा निष्कल्मषं भवति सकल्मषं स्यात्तदा समृद्धमप्यृद्धं भव
ति २२ तदेव स्पष्टं सततिलपद इति स्पष्टार्थः २३ श्रुत्वेनमाह राजा कल्मषमिति अस्यार्थः निष्कल्मषं तपश्चेत्केवलं परि
चक्षत इति श्रुतं तस्य तपसः कल्मषं ब्रूहि हे सनत्सुजात येन निष्कल्मषेण तपसा इदं गुह्यं सनातनं ब्रह्म विद्यामिति २४ एवं
पृष्टः प्राह भगवान् क्रोधेति क्रोधादयो द्वादश यस्य तपसो दोषाः कल्मषाः तथा नृशंसानि च सप्त हे राजन् यस्य तपसो
दोषाः तथा ज्ञानादयो द्वादश चाततानां चित्तीयमानाः शास्त्रे वेदशास्त्रे ये विदिता गुणा द्विजातीनां तान्गुणान्दोषांश्च व
क्ष्यामीत्यभिप्रायः २५ क्रोधादीन्दर्शयति क्रोध इति क्रोधो नाम कामप्रतिघातादुत्पद्यमानेस्ताडनाक्रोशनादिहेतुः काम

सनत्सुजात उवाच निष्कल्मषं तपस्त्वेतत्केवलं परिचक्षते एतत्समृद्धमप्यृद्धं तपो भवति नान्यथा २२ तपोमूलमिदं
सर्वं यन्मां पृच्छसि क्षत्रिय तपसा वेदविद्वांसः परं त्वमृतमाप्नुयुः २३ धृतराष्ट्र उवाच कल्मषं तपसो ब्रूहि श्रुतं निष्क
ल्मषं तपः सनत्सुजात येनेदं विद्यां गुह्यं सनातनं २४ सनत्सुजात उवाच क्रोधादयो द्वादश यस्य दोषास्तथा नृशं
सानि च सप्त राजन् ज्ञानादयो द्वादश चाततानाः शास्त्रे गुणा ये विदिता द्विजानां २५ क्रोधः कामो लोभमोहौ विवि
त्साऽकृपासूया मानशोकौ स्पृहा च ईर्ष्या जुगुप्सा च महागुणेन सदा वर्ज्या द्वादशैते नरेण ॥ २६ ॥ राम राम॥

25

हानिहेतुकश्चैतत्स्मरणविशेषो भोगान्तरेच्छा कंपनादिलिंगकः कामः स्त्र्याद्यभिलाषः लोभः परद्रव्येच्छा अर्जितस्य च द्रव्यस्य
स्वकीयस्य तीर्थे विनियोगासामर्थ्यं वा मोहः कृत्याकृत्यविवेकशून्यता विवित्सा विषयान्वेतुमिच्छा अकृपा निष्ठुरता।
असूया गुणेषु दोषाविष्करणं परगुणे द्विष्टाक्षमा च मानः आत्मबहुमानित्वं शोकः इष्टार्थवियोगजो तत्स्मरणविशे
षो रोदनचिंतनादिलिंगः प्रतीकाररहितः स्पृहा विषयभोगेच्छा ईर्ष्या परश्रिया मत्सरिःस्मृता जुगुप्सा परगुणे
षु पश्चात्तु [illegible] बीभत्सा वा एते क्रोधादयो द्वादश दोषास्तपसः कल्मषरूपाः सदा वर्ज्या महागुणेन ब्राह्मणेन महागु
णत्वं ब्रह्मण्याग्निगुणः तेन ब्रह्मण्याग्निलक्षणेन महागुणसमन्वितेन वर्जनीया इत्यर्थः श्रोत्रं च नाम महोदधौ महद्भू
तमिति श्रोत्रं महत्त्वान्महतामपि तस्याग्निगुणसंयुक्तो महागुण इतिस्मृत इति अथवा ब्राह्मणानां ब्रह्मलक्षणगुण
योगः स्वभावसिद्धः तथा चोक्तं भगवता शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्व
भावजमिति २६॥

सि॰ २५

इदानीमीश्वरार्थमनुष्ठीयमानानां तत्प्राप्तिसाधनज्ञानापेक्षितशुद्धिद्वारेण पारंपर्येण पुरुषार्थत्वमन्यथा सं-
सारहेतुत्वेनापुरुषार्थत्वं दर्शयति श्लोकद्वयेन तदिति यद्धि स्वरूपविपरीतरूपं ब्रह्म तत्तदर्थमुक्तं वेदेन किं तपः
कृच्छ्रचान्द्रायणादि इज्याज्योतिष्टोमादि किंनतो भवतीति चेत्ताभ्यामिज्यातपोभ्यामसौ पूर्वोक्तविनियोगतरीश्व-
रार्थकामानुतिष्ठन् पुण्यमुपैति प्राप्नोति कर्मजन्यापूर्वसंयुक्तो भवति तेन पुण्येन पापं विनिहत्य क्षपयित्वा प-
श्चादुत्तरकाले सक्षपितनिःशेषकल्मषो जायते ज्ञानविदीपितात्मा ज्ञानप्रकाशितचित्तसंतानरहितो यद्ब्रह्मसत्पो
भवति ८ अथ ज्ञानेन परमात्मानमुपैति प्राप्नोति विद्वान्नात्मवित् अन्यथा पुनरीश्वरार्थकर्मानुष्ठानेनक्षपि-
तःशेषकल्मषो ज्ञानी न भवति तदा वर्गफलानुकांक्षी इंद्रियफलानुकांक्षी स्वर्गादिफलानुकांक्षी अस्मिंल्लोके

तदर्थमुक्तं तप एतदिज्याताभ्यामसौ पुण्यमुपैति विद्वान्। पुण्येन पापं विनिहत्य पश्चात्संजायते ज्ञानविदीपितात्मा ८
ज्ञानेन चात्मानमुपैति विद्वान् अथान्यथा वर्गफलानुकांक्षी। अस्मिन्कृतं तत्परिगृह्य सर्वममुत्र भुंक्ते पुनरे-
ति मार्गं ९ अस्मिंल्लोके तपस्तप्तं फलमन्यत्र भुज्यते ब्राह्मणानां तपस्वृद्धमन्येषां तावदेव तत् १० धृ-
तराष्ट्र उवाच कथं समृद्धमत्यृद्धं तपो भवति केवलं सनत्सुजात तद्ब्रूहि कथं विद्यामहं प्रभो ॥ ११ ॥ श्री

कृतं यज्ञादिकं परिगृह्य सर्वममुत्र परलोके तत्फलमुपभुंक्ते ततः कर्मक्षये पुनरेति मार्गं संसारमार्गं तथा च श्रुतिः ॥
तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्त इति ९ इदानीं विद्वदविद्वदपेक्षया कर्मणां फलवैषम्यमाह
अस्मिन्निति अस्मिंल्लोके यत्तपस्तप्तं तस्य फलमन्यत्रामुष्मिंल्लोके भुज्यत इति सर्वेषां समाने ब्राह्मणानां ब्रह्मवि-
दां पुनरयं विशेषः तपः समृद्धं मनीवसमृद्धं फलवृद्धिर्भवतीत्यर्थः परे च विद्यायाकरोति श्रुत्युपनिषदा तदेव वीर्य-
वत्तरं भवतीति अन्येषामनात्मविदां वैषयिकाणां तावदेव तत् न समृद्धं भवति यस्य कर्मणो यत्फलं श्रुतं ताव-
न्मात्रफलसाधनं न फलसमृद्धिहेतुर्भवतीत्यर्थः १० श्रुत्वैवमाह धृतराष्ट्रः कथमिति श्लोकोऽयं स्पष्टार्थः ११

स०मु०
२६

इदानीं दमदोषानाह दमइत्यादि श्लोकत्रयेण दमोऽष्टादशदोषः अष्टादशदोषसमन्वितो भवति किमेतेषां दोषत्व
मितिचेत्तत्राह प्रातिकूल्यं कृतं भवेत् एतेषामन्यतमेन कृते दमस्य प्रातिकूल्यं कृतं भवेत् के ते तानाह अनृत
मिति अनृतमयथार्थवचनं पैशुन्यं परदूषणवचनं तृष्णा विषयाशा प्रातिकूल्यं सर्वेषां प्रतिकूलता।
तमोऽज्ञानं अरतिर्यथालाभासंतुष्टिः अथवा रतिः स्त्र्यादिषु २२ लोकेति लोकद्वेषो लोकानामुद्वेगा
चरणं अभिमानः सर्वत्राप्रणतिभावः [illegible] विवादो जनकलहाचरणं प्राणि
पीडनं स्वदेहपूरणाय प्राणिहिंसा परिवादः समक्षे परदूषणाभिधानं अतिवादो निरर्थकोऽतिप्रलापः।
परितापो वृथा दुःखचिंतनं अक्षमा द्वंद्वासहिष्णुता अधृतिरिंद्रियार्थचपलता २२ असिद्धिरिति अ

दमोऽष्टादशदोषः स्यात्प्रातिकूल्यं कृतं भवेत् अनृतं पैशुनं तृष्णा प्रातिकूल्यं तमोऽरतिः २२
लोकद्वेषोऽभिमानश्च विवादः प्राणिपीडनं परिवादोऽतिवादश्च परितापोऽक्षमाऽधृतिः २२
असिद्धिः पापकृत्तं हिंसा चेति प्रकीर्तिताः एतैर्दोषैर्विमुक्तो यः स दमः सद्भिरुच्यते २३ मदो।
ऽष्टादशदोषः स्यात्त्यागो भवति षड्विधः विपर्ययाः स्मृता एते दमदोषा उदाहृताः २४ श्रेयां
स्तु षड्विधस्त्यागस्तृतीयः सुदुष्करः तेन दुःखं तरत्येव भिन्नं तस्मिन् जितं कृते ॥२५॥

सिद्धिः धर्मेस्वतनवेराचारं पापकृत्यप्रतिषिद्धाचरणं हिंसाऽविहितहिंसा इति दोषाः प्रकीर्तिताः ए
तैरनृतादिभिर्दोषैर्विमुक्तो योगुणः स दम इति सद्भिरुच्यते २३ इदानीं मददोषानाह मद इति एतेऽनृतादि
हिंसांता ये दमदोषत्वेन स्थितास्त एते विपर्ययाः स्मृताः सत्यादिरूपत्वेन स्मृताः दमदोषाः दमनाशकरा उदा
हृतास्तत एते सत्यापैशुन्यातृष्णाऽप्रातिकूल्यातमोऽरतिरलोकद्वेषानभिमानाविवादाप्राणिहिंसात्परिवा
दानतिवादापरितापक्षमाधृतिः सिद्धिरपापकृत्याऽहिंसा इत्येते मदनाशकरा उदाहृताः २४ त्या
गो भवति षड्विध इत्युक्तं तत्राह श्रेयानिति श्रेयांस्तु षड्विधेषु त्यागेषु तृतीयस्त्यागो दुष्करः दुःखसंपा
द्यः तृतीयेन तेन त्यागेन दुःखमाध्यात्मिकादिभिरभिन्नं तरत्येव तस्मिन्त्यागे कृते सर्वं जितं भवत्येव २५

स्वा॰
२६

तेषां सदा वर्ज्यत्वे हेतुमाह एकैकमिति यथा मृगाणां मांसं तरक्षुरिव लिप्समानो मांसान्वेषणपरो लुब्धको मृगयुरनुवर्तते यथा च
तरक्षुर्लुब्धा लब्धा हे लितान् तथा च तेषां मनुष्याणां रंध्रान्वेषणपरा एते क्रोधादयः एकैकं मनुष्यं पर्युपासते अथवा मनु
ष्यं पर्युपासते तरक्षुरिव पाठः तस्मिन्नेकैकं पृथक् पृथक् मनुष्यान् पर्युपासत इति योजना तथा तरक्षुर्लब्ध्वा तान् घ्नंति तस्मा
देतेषां केऽपि दोषो विनाशकारणं यस्मादेवं तस्मात्सदा वर्ज्या इत्यर्थः उक्तं च हैरण्यगर्भे यथा पापस्य कीर्तारे लिंहव्या द्युमृगा
दयः उपद्रवकरास्तद्वत् क्रोधाद्याद्गुणा नृणामिति १७ इदानीं नृशंससप्तकमाह संभोगेति संभोगे विषयसंभोगे सं
विद्धि वैते ते यस्य स संभोगसंवित् विषमिव परेषामुपद्रवं दत्त्वा एधमानो वर्द्धमानः अथवा द्विषमेधमान पाठां
तरं द्विषं द्वेष्यकमेहत्वा मालिनो नह्वरेण एधमानः दत्त्वानुतापी ईषत्तत्रालक्ष्मणस्य अन्यस्य वा दत्त्वा पश्चात्तापं क
रोति स दत्तानुतापी कृपणः यत्किंचिदर्थलवमात्रलोभात्सर्वावमानेयः सहते स कृपणः अबलीयान् ज्ञानबल
वर्जितः वर्गप्रशंसी इंद्रियवर्गप्रशंसी लस्त्योत्सुकः वनितां च द्वेष्टा अनन्यशरणां भार्यां यो द्वेष्टि एते परपूर्वोक्तेभ्यः

एकैकमेते राजेंद्र मनुष्यं पर्युपासते लिप्समानोंतरं तेषां मृगाणामिव लुब्धकः १७ संभोगसंविद्विषमेधमानो दत्ता
नुतापी कृपणोऽबलीयान् वर्गप्रशंसी वनितां च द्वेष्टा एते परे सप्त नृशंसरूपाः १८ ज्ञानं च सत्यं च दमः श्रुतं च अमा
त्सर्यं ह्रीस्तितिक्षानसूया यज्ञश्च दानं च धृतिः शमश्च महाव्रता द्वादश ब्राह्मणस्य १९ यस्त्वेभ्यो न प्रवसेद्द्वादशे
भ्यः सर्वामिमां पृथिवीं स प्रशिष्यात् त्रिभिर्द्वाभ्यामेकतो वा विमुक्ताः क्रमाद्विशिष्टा मोक्षभाजो भवंति ॥ २० ॥

क्रोधादिभ्यः सप्त नृशंसरूपाः १८ इदानीं ज्ञानाद्यो द्वादश ब्राह्मणस्येत्याह ज्ञानमिति ज्ञानं तत्त्वार्थसंवेदनं सत्यं यथार्थभाषणं
भूतहितं च दमो मनसो दमनं श्रुतमध्यात्मशास्त्रश्रवणं मात्सर्यं सर्वभूतेष्वसहमानता तदभावोऽमात्सर्यं ह्रीरकार्येषु
लज्जा तितिक्षा द्वंद्वसहिष्णुता अनसूया परदोषानाविष्करणं यज्ञः अग्निष्टोमादिमहायज्ञश्च दानं ब्राह्मणादि
भ्यो धनादिपरित्यागः धृतिर्विषयसान्निध्ये इंद्रियनिग्रहः शमोंतःकरणोपरतिः बहिःकरणोपरतिरिति केचित् ॥
एते ज्ञानादयो महाव्रताः परमपुरुषार्थसाधनभूता ब्राह्मणस्य वर्जिताः ये ज्ञानादयो द्वादश चात्र ज्ञानादिभिः पूर्व
प्रस्तुतास्ते वर्णिताः १९ इदानीं गुणस्तुतिं करोति यस्त्विति यस्त्वेभ्यः पूर्वोक्तेभ्यो न प्रवसेत् प्रवासं न करोति तैरेव स
मन्वितो भवेत्स सर्वामिमां पृथिवीं प्रशिष्यात् प्रशास्ति आत्मवशीकरोति ईश्वरो भवतीत्यावत् ये एतेषां मध्ये त्रिभि
र्द्वाभ्यां एकतः एकस्माद्वा विमुक्ताः एतेषामन्यतमेनापि समन्विता तेन क्रमेण विशिष्टा ज्ञानिनो भूत्वा मोक्षभाजो भवंति २०

इदानीं कथं समृद्धमित्यादिनोपक्रान्तं तपःप्रकरणार्थमुपसंहरति दोषैरिति दोषैरेतैः क्रोधादयः इत्यादिनोक्तैर्विमुक्तं तु गु
णैरेतैर्ज्ञानादिभिः समन्वितं यदेतत्समृद्धमत्यर्थं तपो भवति केवलं ३२ किं वेनायन्मां पृच्छसि राजेन्द्रेति हे राजन्य।
न्मां पृच्छसि तत्संक्षेपात्समासतो ब्रवीमीति एतत्पापहरं पुण्यं जन्ममृत्युजरापहं ३३ किं तदिति चेत्तत्राह इन्द्रियेभ्यश्चेति
हे भारत सविषयेभ्य इन्द्रियेभ्यो वर्त्तमानेभ्यो मनसश्च तथा अतीतेभ्यः अनागतेभ्यश्च विमुक्तश्चेत्सुखी भवेत् मुक्त
एव भवतीत्यर्थः ३४ एवमुक्ते आह धृतराष्ट्रः आख्यानेति आख्यानं पुराणं पंचमं येषां वेदानां ते आख्यानपंच
माः श्रूयते च छांदोग्ये इतिहासपुराणं च पंचममिति तैराख्यानपंचमैर्वेदैर्भूयिष्ठमत्यर्थं कथ्यते श्लाघ्यते च हेम
न्यते सर्वेषामधिकोयमिति कथ्यत इति केचित्पठंति आख्यानपंचमैर्वेदैः कश्चिज्जनः पंचमवेदी कथ्यत इति केचि
त्पठंतीत्यर्थः तथा चान्ये चतुर्वेदास्त्रिवेदाश्च परे ३५ द्विवेदा इति द्विवेदा एकवेदाश्चानृचश्च तथापरे एतेषु मनुष्ये।

दोषैरेतैर्विमुक्तं तु गुणैरेतैः समन्वितं एतत्समृद्धमत्यर्थं तपो भवति केवलं ३२ यन्मां पृच्छसि राजेन्द्र संक्षेपात्प्रब्रवी
मि ते एतत्पापहरं पुण्यं जन्ममृत्युजरापहं ३३ इन्द्रियेभ्यश्च पंचभ्यो मनसश्चैव भारत अतीतानागतेभ्यश्च विमु
क्तश्चेत्सुखी भवेत् ३४ धृतराष्ट्र उवाच आख्यानपंचमैर्वेदैर्भूयिष्ठं कथ्यते जनः तथा चान्ये चतुर्वेदास्त्रिवेदाश्च
तथापरे ३५ द्विवेदाश्चैकवेदाश्च अनृचश्च तथापरे एतेषु मे ध्रुवं ब्रूहि यमहं वेद ब्राह्मणं ३६ सनत्सुजात उ
वाच एकवेदस्य चाज्ञानाद्वेदास्ते बहवोऽभवन् सत्यस्यैकस्य राजेन्द्र सत्ये कश्चिदवस्थितः ३७ श्री।

ध्रुवं कं ब्रूहि यमहं ब्राह्मणं वेद विद्यां ३६ एवं चेत्स्वाभाविकत्वात्सदा मंदाद्वितीयब्रह्मणावस्थितः स एव ब्राह्मण इति दर्श
यन्नेत्याह रिकस्य सर्वस्य तत्त्वानमूलत्वं दर्शयति एकवेदस्येति एकस्य वेदस्य वेद्यमिदं रूपमनिदं वेदहेतुर्वेदनं वे
दः एकस्याद्वितीयस्य सच्चिद्रूपस्येत्यर्थः तस्यैकवेदस्याज्ञानात् नवगमात् इमारूपो वेदा बहवो भवन् अत्र कुमारयो वे
दानात्मनि पर्यर्थं विचारं कुर्वन्तीति वेदाख्या भवन्तु अथवा मज्ञां च साधयंतीति वेदा विदंतीति वेदनहेतुभूता इति वा वे
दाः अथवा असाधीनमात्मानं लभंत इति वा वेदाः ब्रह्मण्यात्मतया लाभहेतव इति वेदाः विद विचारणे विद सत्तायां
विद लाभे विद ज्ञाने एतेभ्यो धातुभ्यो विषये वर्त्तते यस्मात्ततो वेदा इत्युक्ताः तदेवं वेदं किमिति चेत्सत्यं ज्ञानमनन्तं ब्रह्मे।
ति श्रुतेः तस्मात्सत्यस्य वेदरूपस्याब्रह्मणोऽनवगमाद्वेदा बहवो व्याख्याताः सर्वे वेदास्तदर्थदर्शनहेतवः ३७ ॥

त्यागस्य द्वैरूप्यं दर्शयति अर्हते इति । अर्हते दानयोग्याय याचमानाय पुत्रान् वित्तं ददातीति यत्तदेव त्यागद्वयं वक्ष्यमाणमध्ये प्रथमं
द्रष्टव्यं पूर्तं क्षितीयं स्यादिति श्रौते कर्मणि यद्दानं पूर्तं स्मार्ते कर्मणि इष्टं देवेभ्यो दत्तं पूर्तं विज्ञेयम् इति किंचित् नि
त्यं वैराग्ययोगतः विशुद्धसत्त्वस्य नित्यं त्यागो द्वितीयः दर्शितः विरक्ततया धनादिपरित्यागः २६ कामेति कामत्या
गश्च राजेन्द्र सत्तृतीय इति स्मृतः … तृतीय … त्याग इत्यभिप्रायः किमभिभवती
त्यत आह यस्मिंस्तु त्यागे समन्वितः सोऽप्रमादी भवेत् स च प्रमादो गुणः … समन्वि
तो भवति २७ कर्तव्यान्दर्शयति सत्यमिति सत्यं यथार्थभाषणं ध्यानं चेतसः कस्मिंश्चित् … मण्ड
लपुरुषादौ तैलधारावत् … समाधानं प्रत्याहार … कृत्वा स्वाभाविकं चित्त
स्थानं द्वितीयत्र सामनावस्थानं चो … विचारः वैराग्यं दृष्टानुश्रविकविषयवितृष्ण

अर्हते याचमानाय पुत्रान्वित्तं ददाति यः । इष्टापूर्ते क्षितीयं स्यान्नित्यं वैराग्ययोगतः २६ कामत्यागश्च
राजेन्द्र सत्तृतीय इति स्मृतः । अप्रमादी भवेदेतैः स चाप्यष्टगुणो महान् २७ सत्यं ध्यानं समाधानं चोद्यं वैराग्य
मेव च । अस्तेयं ब्रह्मचर्यं च तथाऽसंग्रहमेव च २८ एवं दोषा दमस्योक्तास्तान्दोषान्परिवर्जयेत् दोषत्यागे
प्रमादः स्यात्स चाप्यष्टगुणो मतः २९ तौ तु सत्यं सुखं नाहुः सत्ये … सत्यात्मा भव राजेन्द्र सत्ये
लोकाः प्रतिष्ठिताः ३० निवृत्तेनैव दोषेण तपोव्रतमिहाचरेत् एतद्धातृकृतं वृत्तं सत्यमेव सतां व्रतं ३१

ना अस्तेयमचौर्यमात्मनोऽत्र … अचौर्यमुक्तं योऽन्यथा सन्तमात्मानमित्यादि ब्रह्मचर्यमसङ्गः तथा चोक्तं द
र्शनं स्पर्शनं केलिः कीर्तनं गुह्यभाषणं संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च एतन्मैथुनमष्टाङ्गं प्रवदन्ति
मनीषिणः विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणमिति असंग्रहो अपरिग्रहः पुत्रदारक्षेत्रादीनां एतत्परिपाल
येत् २८ दोषान्वर्जयेदित्याह एवं दोषा इति दमोऽष्टधा दर्पादोषः स्यादिति दोषा उक्तास्तान्दोषान्वर्जयेदिति कस्मा
दित्यत आह दोषत्यागोऽप्रमादः स्यात् … प्रमादी न स्यादित्यर्थः सोऽप्यप्रमादो
ऽष्टगुणो मतः सत्यं ध्यानमित्यादिना पूर्वमेवोपदिष्ट इत्यर्थः २९ इदानीं सत्यं स्तौति … अमृतमो
क्षः सत्यात्मा सत्यस्वरूपो भव हे राजेन्द्र सत्ये लोकाः प्रतिष्ठिताः ३० निवृत्तेनैवेति निवृत्तेनैव दोषेण क्रोधा
दयस्त्यादिना एवोक्तदोषराहित्येन तपोव्रतमिहाचरेत् एतद्धात्रा परमेश्वरेण दत्तं तेषां सत्यमेव सतां परं व्रतं ३२

स०सु० २८

एवं तर्हि वेदस्य वेद्यत्वे ऽन्यदेवतद्विदितात् यतो वाचो निवर्तन्त इत्यादिविरोधः प्रसज्येतेत्यत आह नवेदानामिति नवेदाना
मृगादीनां मध्ये कश्चिदपि वेदः परमात्मनो वाचामगोचरस्य संविद्रूपस्य वेत्तास्ति कस्माद्यस्माद्येन जडेरू
पेण वेदं संविद्रूपं न विदुः न वेद्यं प्रपंचमपि न विदुः संविद्विरोधीनत्वात्स्ववेत्तृसिद्धेः यस्मात्स्वविरोधीनात्स्ववेत्तृसिद्धिस्त
स्माद्यो वेदं विजानाति वेदं संविद्रूपं परमात्मानं स च वेदं वेद्यमिदं सर्वं तथा च श्रुतिः ऽआत्मनो वा अरे दृष्टेन श्रव
णेन मत्या विज्ञानेनेदं सर्वं विदितमिति यो वेदं वेद्यमिदं रूपं न स वेद जानाति स त्वं सत्यादिलक्षणं परमात्मानं ५२
नन्वेवं तर्हि वेद्यं न वेदं न विदुर्न वेद्यमित्ति विवदता ऽनात्मविदः प्रपंचासिद्धिर्वेदप्रसक्ते भवतीत्याशंक्याह योवेदेति
यो वेदं जानाति ऋग्वेदादीन्वेदान्स च वेदं वेद्यं सोप्यनात्मविदवच्छिन्नेन संवेदनेन न वेद्यं प्रपंचं वेद नन्वेवं तर्हि
वेद्यवत्परमात्मानं विजानीयादित्याशंक्याह न तं परमात्मानं वाचामगोचरं विदुर्वेदविदः नवेदाः वेदाऽप्र

नवेदानां वेदिता कश्चिदस्ति वेद्यं न वेदं न विदुर्न वेद्यं यो वेद वेदं स च वेद वेद्यं यो वेद वेद्यं न स वेद सत्यं ॥ ५१
यो वेद वेदान्स च वेद वेद्यं न तं विदुर्वेदविदो न वेदाः तथापि वेदेन विदन्ति वेदं ये ब्राह्मणा वेदविदो भवंति ५२
धामांशभागस्य तथा हि वेदा यथा च शाखा ह्यमहीरुहस्य संवेदनेनैव यथा मनं [illegible] परमात्मनो च ५३

पि न तं विदुः न तं विषयीकुर्वन्तीत्यर्थः नन्वेवं तर्हि कथमौपनिषदं ब्रह्म स्यादित्याह तथापि वेदेन विदन्ति वेदं य
द्यप्यवागोचरं विषयं ब्रह्म तथापि [illegible] वेदेन श्रोत्रादिना विदन्ति जानन्ति वेदं संविद्रूपं परमात्मानं के ते ये ब्रा
ह्मणा वेदविदो भवंति वेदानां वेदप्रतिपाद्यं [illegible] कारं जानातीत्यर्थः ५२ कथं तर्हि ऽप्रविषयमेव ब्रह्म वेदाः प्र
तिपादयन्तीत्याशंक्याह धामेति धामांशभागस्य शान्तिधाम [illegible] इति श्रुतेः वेदा अंशभागस्य प्रतिपादक [illegible]
कला दृष्टान्ते यथा महीरुहस्य [illegible] शाखा [illegible] भवन्ति तथा हि वेदास्तत्र [illegible] परमात्मनः स्वरूपमतस्सं
इनं नि [illegible] विना [illegible] परमात्मानं [illegible] भवन्ति न पुनः साक्षाद्वाचामगोच
रं परमात्मानं प्रतिपादयन्तीति ५० ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥

२८

तंपुनः कश्चित्तत्वे स्थितः इति भूयो मे शृणु सत्यादिति सत्याहिंसानादिलक्षणाद् ब्राह्मणा अच्यवमानानां संकल्पा वि।
तथा भवन्त्यर्था भवंति स्वाभाविकसत्यसंकल्पाद्यान सिध्यंतीत्यर्थः ततः कर्मयज्ञादिप्रतीयेन विस्तृतं भवेदित्यर्थः
तद्धेतत्सर्वं सत्यस्य सत्यादिलक्षणस्य ब्रह्मणो नवधारणादनवगमादात्माज्ञाननिमित्तत्वात्संसारस्य पापात्पर
मात्मानमात्मत्वेन साक्षान्न जानाति नाचरयं तापत्रयाभिभूतो मकरादिभिरिव रागादिभिः समाकृष्यमाणो मो।
मुमुक्षमाणोऽसत्यसंकल्पः स्वर्गविलादिहेयसाधने वर्तत इत्यर्थः ३८ इदानीं ब्राह्मणलक्षणमाह विद्यादिति वहुप
ठंते आरभ्यानपंचमवेदाध्यायिनं बहुवाग्मिनं विद्यान साक्षाद्ब्राह्मणमिति कस्तर्हि मुख्यो ब्राह्मण इति चेत्तं पैरं
नत्सत्यादिलक्षणान्नापैति न क्षरति चिरसदा मेदाह द्वितीयब्रह्मरूपेणावतिष्ठते स एव ब्राह्मणस्त्वया ज्ञेयो नेतरः
यः सत्यादच्युतः प्रकृत्यार्थः सन्कर्मणि प्रवर्तते तथा च श्रेष्ठविदमेव ब्राह्मणं दर्शयति मौनं चामौनं च नि

सत्यादच्यवमानानां संकल्पा वितथाऽभवन् ततः कर्मप्रतीयेन सत्यस्यानवधारणात् ३८ विद्याद्ब
हुपठंतं सुबहुवाग्मिनं ब्राह्मणं य एव सत्यान्नापैति स ज्ञेयो ब्राह्मणस्त्वया ३९ छंदांसि नाम द्विपदां वरिष्ठ
स्वच्छंदयोगेन भवंति तत्र छंदोविदस्तेन च तानधीत्य गता हि वेदस्य न वेद्यमार्याः ४०॥ राम राम।

विद्यांच ब्राह्मण इति विद्याया विज्ञो विचिकित्सो ब्राह्मणो भवतीति च ३९ भवेदेतदेवं यद्येतदेव ब्रह्मसत्यं सिध्येन्न चसि
कृत्यन्तपरत्वाद्वेदस्येति तत्राह छंदांसीति हे द्विपदां वरिष्ठ छंदांसि वेदाः स्वच्छंदयोगेन स्वच्छंदेन स्वाधीनेन यथाकाम
मित्यर्थः तत्रैव परमात्मनि भवंति तत्रैव प्रमाणं भवंति श्रूयते च सर्वे वेदा यत्पदमामनंति वेदैश्च सर्वैरहमेव
वेद्य इति च पुरुषार्थे पर्यवसायित्वाद्वेदस्य तत्र प्राप्तिरिरूप्या इति नित्याशुचिदुःखानुविद्धत्वेन पुरुषार्थत्वाभावात्ते तत
स्वरूपतत्साधनप्रतिपादकत्वेन वेदानां प्रमाणत्वमित्यर्थः यस्माद्वेदाः स्वच्छंदयोगेन तत्रैव परमात्मनि प्रमा
णं भवंति तेन हेतुना नान्वेदानधीत्याधिगम्य वेदांतश्रवणाच्चिकारणं हत्वा गताः आश्रावेदस्य संविद्रूपस्य पर
मानंदस्वरूपं न वेद्यं प्रपंचमार्याः पंडिताः ब्रह्मविदः ४०॥ राम॥ राम॥ राम॥ राम॥ राम॥ राम॥ ॥

मनिरव्येष एवेत्याह मौनाद्धीति मौनात्सर्वोत्कात्तधर्मीभावादेव मुनिर्भवति न पुनररण्यवासमात्रान्मुनिर्भवति
नैवाममपित्नू धर्मीभूतानां मध्ये यस्तु पुनरक्षरमविनाशिनं तं परमात्मानं वेद ऽयमहमस्मीति साक्षाज्जानाति
स मुनिः श्रेष्ठ उच्यते श्रूयते च एतमेव विदित्वा मुनिर्भवतीति ४७ वैयाकरणोऽप्येष एवेत्याह सर्वेति सर्वार्था
नां व्याकरणाद्वैयाकरणः न पुनः प्रातिकर्षस्य व्याकरणाद्वैयाकरणो भवति भवतु सर्वार्थानां व्याकरणाद्वै
याकरणत्वं ततः किमित्याशंक्याह तन्मूलतो व्याकरणं पूर्वोक्तादक्षराद्धि सर्वस्य नामरूपप्रपंचस्य व्याकर
णं श्रूयते च अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तस्माद्ब्रह्मण एव साक्षाद्वैयाकरण
त्वं व्याकरोतीति तत्तथा विद्वानपि ब्रह्मतथैव व्याकरोतीति वैयाकरणः ४८ सर्वज्ञोऽप्येष एवेत्याह प्रत्यक्षे
ति प्रत्यक्षदर्शी लोकानां यः प्रत्यक्षेण भूरादीं ल्लोकान्पश्यति स सर्वदर्शी नो भवेन्न सर्ववित्स्वं परमात्मानं पश्य

मौनाद्धि मुनिर्भवति नारण्यवसनान्मुनिः अक्षरं तं तु यो वेद स मुनिः श्रेष्ठ उच्यते ४७ सर्वार्थानां व्याकरणा
द्वैयाकरण उच्यते तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा ४८ प्रत्यक्षदर्शी लोकानां सर्वदर्शी भवेन्नरः
सत्ये वै ब्राह्मणस्तिष्ठंस्तद्विद्वान्सर्ववित्भवेत् ४९ ज्ञानादिषु स्थितोऽप्येवं क्षत्रिय ब्रह्म पश्यति वेदानां चा
रपूर्वेण चैतद्विद्वन्ब्रवीमि ते ५० इति श्रीमहाभारते उद्योगपर्वणि सनत्सुजातीये द्वितीयोऽध्यायः २ ॥ ॥

त्यसौ पुनः सत्येऽसत्यादिलक्षणे ब्रह्मणि तिष्ठन्मनः समाधायेति तद्विद्वान्सत्यादिलक्षणं ब्रह्म विद्वान्नात्मत्वे
न जानन्सर्वं जानातीत्यर्थः तस्मादिम एव सर्वज्ञो नानात्मदर्शी ४९ यत्त्वितेभ्य इत्यादिनोक्तमेवार्थं पुनरपि दर्श
यति अवश्यकर्तव्यत्वदर्शनार्थं ज्ञानेति ज्ञानादिषु ज्ञानं चेदित्यादिना पूर्वोक्तेषु स्थितोऽपि एवं यथा सत्ये
ति एवं ब्रह्म पश्यति एवमेव ज्ञानादिषु स्थित्वा ब्रह्म पश्यति वेदानां चारपूर्वेण वेदान्तश्रवणादिकेनेत्यर्थः
अथवानुपूर्व्येणांतरविद्धानमेतं [illegible] सुस्थितोऽपि न केवलं तन्मात्रेण पश्यति अपि तु एवमेवं वक्ष्यमा
णप्रकारेण वेदांतविचारेण वेदांतमुप[illegible]पूर्वकमेव पश्यति ब्रह्म एतद्वेदानां चारप्रकारं हे विद्वन्ब्रवीमि
वक्ष्यामीत्यर्थः ५० इति श्री[illegible]र्यविरचिते सनत्सुजातविवरणे द्वितीयोऽध्यायः ॥ २ ॥

यएवं वेदानां वेदरूपात्मप्रतिपा[illegible] ब्राह्मण्यमाचरेत् सोऽपि ब्राह्मणः इत्याह । अभीति पूर्वोक्तप्रकारेण विच
क्षणमाख्यातारमभिब्राह्मणं मे शृणु न तु बाल्यपाण्डित्यादिकं निर्विद्यावस्थितमेव ब्राह्मणं ब्रूते । अथ ब्रा
ह्मणं इति कथमुच्यते । अभिजानासि त्वं ब्राह्मणमाख्यातारं विचक्षणमिति तत्राह एवं वेदानां वेदप्रतिपादनं
मेयोऽत्र यो हि विजानाति परं हि तस्य ब्रह्म जानात्येव यो हि पाण्डित्यं निर्विद्य स्थितः सह्यं बाल्यादिकं निर्वि
द्य ब्राह्मणो भवतीत्यर्थः ॥ ४४ यस्मात्तस्यैव निरूपस्यैव ब्राह्मणस्य प्रसिद्धिः तस्माद्विषयपरो न भवेदित्याह
नास्येति नास्य जगतः पर्येषणं गच्छेद्विषयान्वेषणपरो न भवेदित्यर्थः । अविचिन्वन्विषयसंचयम
कुर्वन् इमं प्रत्यगात्मानं वेदेषु उपनिषत्सु तत्त्वमस्यादिवाक्येषु ततः पश्चात्पश्यति तं प्रभुं परमात्मान
मात्मत्वेन जानातीत्यर्थः । अथवा नास्यात्मनः पर्येषणमन्वेषणं गच्छेत् अत्यर्थेषु प्रतिपक्षभूतदेहं

अभिजानामि ब्राह्मणमाख्यातारं विचक्षणं एवं यो हि विजानाति विजानात्येव तत्परं ॥ ४४ ॥
नास्य पर्येषणं गच्छेत् प्रत्यर्थेषु कथंचन अविचिन्वन्निमं वेदे ततः पश्यति तं प्रभुं ॥ ४५ ॥
तूष्णीम्भूत उपासीत न चेष्टेन्मनसाऽपि अभ्यावर्तेत ब्रह्मास्मै बहु अनन्तरमाप्नुयात् ॥ ४६ ॥

द्रियादिषु देहेन्द्रियतद्धर्मानात्मत्वेन न गृह्णीयादित्यर्थः । अविचिन्वन् देहेन्द्रियतद्धर्मानात्मत्वेनासंचिन्वन् तत्सा
क्षिणमात्मानमेवाप्रतिपद्यमानः तत्त्वंपदार्थशोधनानन्तरमिमं प्रमातारं साक्षिणं परमात्मानं पश्यति ।
देहेन्द्रियादिकमात्मत्वेनाप्रतिपद्यमानस्तत्त्वमस्यादिवाक्यैः परमात्मानमात्मत्वेन पश्यतीत्यर्थः ॥ ४५
यस्मादेवं तस्मात्तूष्णीम्भूत इति यस्मात्सर्वविषयपरित्यागे एव परमात्मदर्शनसिद्धिस्तस्मात्तूष्णीम्भूतः स्वात्मन्य
तिष्ठेत् सर्वं परित्यज्य केवलो भूत्वा स्वात्मानमेवालोकमुपासीत न चेष्टेन्मनसाऽपि विषयध्यानं कुर्यात् यत्
तूष्णीम्भूतो विषयोपसंहारं कृत्वा स्वात्मानमेवालोकमुपास्ते अस्मै तूष्णीम्भूताय ब्रह्म पूर्वोक्तलक्षणमभ्यावर्तेता
भिमुखी भवेदित्यर्थः । अयमेव च तस्यैव आत्मा ब्रह्म न तु नानुस्वामिति अनन्तरमाविर्भूतस्वरूपः सन् ॥ ४६ ॥

एवं पृष्टः प्राह भगवान् आचार्येति । आचार्ययोनिमिह ये प्रविश्य आचार्यसमीपं गत्वेत्यर्थः भूत्वा गर्भमुपासनादिना ।
शिष्यो भूत्वा ब्रह्मचर्यं गुरुशुश्रूषादिकं कुर्वंति इहैवास्मिंल्लोके शास्त्रकाराः शास्त्रकर्तारः पंडिता भवंति ततो वा
ऽस्मादिकं निर्विघ्नाः सन्तो भूत्वा प्रारब्धकर्मक्षये विहाय देहं परमं याति सत्यं सत्यादिलक्षणं परमात्मानं प्राप्नु
वंति ५ किंच । अस्मिंल्लोकेति । अस्मिंल्लोके विजयंतीह कामान् ब्राह्मीं स्थितिं ब्रह्मण्येव स्थितिमनुतितिक्षमाणा
ते आत्मानं देहं इंद्रियादिभ्यो निष्कृष्य तत्साक्षिणं चिन्मात्रं निर्वहंति निःमिवेति मुंजादिषीकामिव यथा मुंजा
दिषीकां मतत्स्थो निर्वहंत्येवं कोशपंचकेभ्यो निष्कृष्य सर्वात्मानं प्रतिपद्यंत इत्यर्थः केन धीरभावात् धैर्येण अ
यते च वक्तवल्लीषु । अंगुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः तं स्वाच्छरीरात्प्रवृहेन्मुंजादिवेषीकां
धैर्येण तं विद्याच्छुक्रममृतमिति ६ आचार्ययोनिमिह ये प्रविश्य आचार्यस्य योनित्वं स्थानत्वं तत्कथं ततश्च तस्य योनित्वमि
त्याशंक्य स एव साक्षाज्जनयतीत्याह शरीरमेताविति शरीरमेवास्यैतौ मातापितरौ कुरुतः नात्मानं स्वस्वरूपेण जनय

सनत्सुजात उवाच । आचार्ययोनिमिह ये प्रविश्य भूत्वा गर्भं ब्रह्मचर्यं चरंति इहैव ते शास्त्रकारा भवंति विहाय देहं परमं
यांति सत्यं ५ अस्मिंल्लोके विजयंतीह कामान् ब्राह्मीं स्थितिमनुतितिक्षमाणाः ते आत्मानं निर्वहंतीह देहान्मुंजादि
षीकामिव धीरभावात् ६ शरीरमेतौ कुरुतः पिता माता च भारत आचार्यतस्तु यज्जन्म तत्सत्यं वै यथामृतं ७ स आवृ
णोत्यमृतं संप्रयच्छन् तस्मै न द्रुह्येत् कृतमस्य जानन् गुरुं शिष्यो नित्यमभिवादयीत स्वाध्यायमिच्छेच्च सदाऽप्रमत्तः ८

ति यदिदं हि व्यात्मना जन्म तदसत्यं । आचार्यतस्तु यदिदं सच्चिदानंदानं नाद्वितीयब्रह्मात्मना जन्म तत्सत्यं परमार्थभूतं
यथैवामृतं विनाशवर्जितं तस्मात्स एव साक्षाज्जनयितेत्यर्थः श्रूयते च प्रश्नोपनिषदि त्वं हि नः पिता योऽस्माकमविद्या
याः परं पारं तारयसीति तथा चाह आपस्तंबः स हि विद्यातस्तं जनयति तच्छ्रेष्ठं जन्म शरीरमेव मातापितरौ जनयत इ
ति ७ यस्मादाचार्याधीना परमपुरुषार्थसिद्धिस्तस्मात् स आवृणोत्यापूरयति अमृतमेनं ब्रह्मात्मत्वेन संप्रयच्छन्
तस्मै आचार्याय न द्रुह्येत् द्रोहं नाचरेत् तथा च श्रुतिः यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशं
ते महात्मनः तथा चाहापस्तंब [illegible] न द्रुह्येत् कदाचन स हि विद्यातस्तं जनयतीति कृतमस्य जानन् अस्येति त
दीयार्थ [illegible] अनेन आत्मनः कृतमुपकारं जानन् कथं ते हि कर्तव्यमित्याह गुरुं शिष्यो नित्यमभिवादयीत
देवमिवाचार्यमुपासीत तथा च श्रुतिः यस्य देवे परा भक्तिर्यथा देवे तथा गुराविति तथा स्वाध्यायमिच्छेच्छ्र
वणादिपरो भवेच्च सदा अप्रमत्तः । अप्रमादी सन् ॥ ८ ॥ राम ॥ ॥ राम ॥ ॥ राम ॥

हरिः ॐ ॥ इदानीं ब्रह्मचर्यादिसाधन[illegible]रूनानंतरं तत्साध्यं च ब्रह्म प्रतिपादयितुं तृतीयचतुर्थोध्यायावारभ्यते तत्र तावद्ब्रह्मचर्यादिसाधनं [illegible] ब्रह्मवेदनाकांक्षी प्राह धृतराष्ट्र सनत्सुजातेति हे सनत्कुमार यद्यस्मात्त्वं परमार्थां मुक्त्यर्थां ब्राह्मीं [illegible] वाचं वदसि पुरा मुक्तमं विश्वरूपां नानारूपां कार्येषु कार्येषु रूपेषु प्रपंचेषु दुर्लभां [illegible] प्रब्रूहि मे वाक्यमेवं भूतं कुमार यस्मात्त्वं ब्राह्मीं वाचं परमपुरुषार्थसाधनभूतां सुदुर्लभां वदसि तस्मात्त्वं वक्तुमर्हसीत्यभिप्रायः १ एवं पृष्टः प्राह भगवान् नैतदिति नैतद्ब्रह्म त्वरमाणेन पुरुषेण लभ्यं यद्ब्रह्म त्वं मां पृच्छसि अभिषंगेन राजेन् कथं तर्हि लभ्यमित्याह बुद्धौ व्यवसायात्मिकायां प्रलीने मनसि प्रचिंत्या विद्या हि सा संकल्पविकल्पात्मके यदा पुनः संकल्पविकल्पात्मकं मनो

धृतराष्ट्र उवाच सनत्सुजात यदिमां परार्थां ब्राह्मीं वाचं वदसि हि विश्वरूपां परां हि कार्येषु सुदुर्लभां कथां प्रब्रूहि मे वाक्यमेवं कुमार १ सनत्सुजात उवाच नैतद्ब्रह्म त्वरमाणेन लभ्यं यन्मां पृच्छस्यभिषंगेन राजन् बुद्धौ प्रलीने मनसि प्रचिंत्या विद्या हि सा ब्रह्मचर्येण लभ्या २ आद्यां विद्यां वदसि हि सत्यरूपां या प्राप्यते ब्रह्मचर्येण सद्भिः यां प्राप्यैनं मर्त्यलोकं त्यजंति या वै विद्या गुरुवृद्धेषु नित्या ३ धृतराष्ट्र उवाच ब्रह्मचर्येण या विद्या शक्या वेदितुमंजसा तत्कथं ब्रह्मचर्यं स्यादेतद्विद्वन्ब्रवीहि मे ॥४॥

विषयेभ्यः परावृत्य स्वात्मन्येव निश्चलं भवतीत्यर्थः यदैवं बुद्धौ प्रलीने मनसि प्रचिंत्या विद्या सा ब्रह्मचर्येण अभ्यासमात्रेण न लभ्या २ किंच आद्यामिति आद्यां सर्वादिभूतां ब्रह्मविषयां विद्यां हि सत्यरूपां परमार्थरूपां वदसि यद्वा आद्यां मकार्यभूतां सत्यरूपां प्रपंचाविषयां विद्यां वदसि तस्मात्त्वरमाणेन ब्रह्मचर्यादिसाधनोपेतेनोपसंहृतां तत्करणेनैव लभ्यामित्याह या प्राप्यते ब्रह्मचर्येण सद्भिः यां प्राप्यैनं मर्त्यलोकं त्यजंति या विद्या गुरुवृद्धेषु गुरुरूपेण विद्याप्रदानादिना वर्धितेषु पुत्रेषु नित्या नियता ३ एवमुक्ते ब्रह्मचर्यविज्ञानाय प्राह धृतराष्ट्रः ब्रह्मेति या विद्या ब्रह्मचर्येण वेदितुं शक्या तत्साधनभूतं ब्रह्मचर्यं कथं स्यादेतद्ब्रह्मचर्यं विद्वन्ब्रवीहि मे ॥४॥

मार्थस्वरूपां मे ४०

स॰सु॰ २२

इदानीं ब्रह्मचर्यस्तुतिं करोति एतेनेति द्वाभ्यां पादसप्तकस्य स्पष्टार्थः आह्नोऽहनि संसमह आह्नाय जगतां द्योतना
य सूर्यश्च जायते उक्तं च आह्नोद्दीप्तिश्च कथ्यत इति २५॥ २६ कथमेकस्य ब्रह्मचर्यस्यानेकफलसाधनत्वमित्य
त आह आकांक्षेति यथा चिंतामण्यादयो रसभेदार्थिनां आकांक्षार्थस्य संयोगात्तत्तदाकांक्षानुरूपमर्थं प्रयच्छंति
एवमेतद्ब्रह्मचर्यमाकांक्षितमर्थं प्रयच्छतीति ज्ञात्वा तत्तत्फलार्थं ब्रह्मचर्यं चरित्वा तादृग्भावं गता इमे देवा
दयः यस्मादाचार्यसान्निध्यनुष्ठिताद्ब्रह्मचर्यात्परमपुरुषार्थप्राप्तिस्तस्मादाचार्ययोनिं प्रविश्य गर्भो भूत्वा ब्रह्म
चरेद् सचर्यमित्यर्थः २७ नन्वेवं ज्ञाननिष्ठा यदि ज्ञानस्यैव पुरुषार्थत्वं भवेदपि तु कर्मणामेवेत्याशंक्याह अंतवं

एतेन ब्रह्मचर्येण देवा देवत्वमाप्नुवन् ऋषयश्च महाभागा ब्रह्मचर्येण चाभवन् २५ एतेनैव सगंधर्वा
रूपमप्सरसोऽजयन् एतेन ब्रह्मचर्येण सूर्यो आह्नाय जायते २६ आकांक्षार्थस्य संयोगाद्रसभेदा
र्थिनामिव एवं ह्येते समाज्ञाय तादृग्भावं गता इमे २७ अंतवंतः क्षत्रिय ते जयंति नानंतं
वैश्वात्मलोकं जयंति ज्ञानेन विद्वांस्तेज अभ्येति नित्यं न विद्यते ह्यन्यथा तस्य पंथाः ॥२८॥ श्री॥

न२ २७

तइति हे क्षत्रिय ते कामिनः अंतवंतो विनाशिनो लोकान् जयंति नानंतं वैश्वात्मभूतं परमात्मानं लोकं
जयंति केन यत्नं तल्लोकप्राप्तिरित्याशंक्याह ज्ञानेन विद्वांस्तेज अभ्येति नित्यमिति नित्यमविनाशि पात्म
भूतमेवाभ्येति तेजो ज्योतिः न कर्मणा कस्मात्पुनर्ज्ञानेनैवाप्नोति न विद्यते ह्यन्यथा तस्य पंथाः तस्य
नित्यस्य पूर्णानंदज्योतिषो ज्ञानं विना साधका अन्यः पंथा मार्गो नास्त्येव श्रूयते च तमेव विदित्वातिमृत्यु
मेति नान्यः पंथा विद्यतेऽयनायेति २८ ॥

सा॰ २२

इदानीं चतुष्पाद्ब्रह्मचर्यं श्लोकचतुष्टयेनाह शिष्येति शिष्यवृत्तिक्रमेणैवाचार्ययोनिमिह येऽस्यादिनोक्तक्रमेण शुचिर्विद्यामाप्नोति इति यद्ब्रह्मचर्यं तेन तस्यास्य प्रथमः पाद उच्यते ९ स्पष्टार्थः श्लोकः तथा चोक्तं आचार्यवदाचार्यदारेषु वृत्तिराचार्यपुत्रे वृत्तिश्चेति १० आचार्येणेति आचार्येणात्मनः कृतमुपकारं विजानन् ज्ञात्वाचार्यं परमपुरुषार्थज्ञानलाभावगम्यभाव तोऽस्मीत्यनेन स्वाभाविकचित्त[illegible]नेन द्वितीयब्रह्मात्मना यथावद्दृष्ट्वा क्षितोऽस्मीति चिंतयन् तमाचार्यं प्रति दृढबुद्धिः सन् यदात्मनः कृतार्थत्वमन्यते सवैतत्तीयो ब्रह्मचर्यस्य पादः ११ आचार्यायेति स्पष्टार्थः १२ इदानीं चतुष्पादी विद्या दर्शयति कालेनेति स्पष्टार्थः अत्र क्रमो न विवक्षितः प्रथमं गुरुसंयोगतः ततउत्साहयोगेन बुद्धिविशेषप्रादुर्भावेन ततः कालेन बुद्धिपरिपाकेन तथार्थमिति पादविशेषणेन ततः शास्त्रेण सहाध्यायिभिः तत्वविचारेण तथा चोक्तं श्री

शिष्यवृत्तिक्रमेणैव विद्यामाप्नोति यः शुचिः ब्रह्मचर्यव्रतस्यास्य प्रथमः पाद उच्यते ९ यथा नित्यं गुरौ वृत्तिः गुरुपत्न्यां तथाचरेत् तत्पुत्रे च तथा कुर्वन् द्वितीयः पाद उच्यते १० आचार्येणात्मकृतं विजानन् ज्ञात्वाचार्यं भावितोऽस्मीत्यनेन यन्मन्यते तं प्रति दृढबुद्धिः स वै तृतीयो ब्रह्मचर्यस्य पादः ११ आचार्याय प्रियं कुर्यात् प्राणैरपि धनैरपि कर्मणा मनसा वाचा च तुर्थः पाद उच्यते १२ कालेन पादं लभते तथार्थं तथा च पादं गुरुयोगतश्च उत्साहयोगेन च पादमिच्छेच्छास्त्रेण पादं च ततोऽभियाति १३ ज्ञानादयो द्वादश यस्य रूपमन्यानि चांगानि तथा बलं च आचार्ययोगे फलतीति चाहुर्ब्रह्मार्थयोगेन च ब्रह्मचर्यं १४ ॥ राम ॥ राम ॥ राम ॥

चार्यात्पादमादत्ते पादं शिष्यस्वमेधया कालेन पादमादत्ते पादं सब्रह्मचारिभिः १३ ज्ञानादीनामाचार्यसन्निधाने फलमाह ज्ञानेति ज्ञानादयो ज्ञानं च सत्यादिरूर्वोक्ता द्वादश गुणा यस्य पुरुषस्य स्वरूपमन्यानि चांगानि श्रेयांसि मद्धस्त्यागः सत्यं ध्यानमिति श्लोकद्वयेनोक्तानि तथा बलं च तद्धर्मपरिपालनसामर्थ्यं सर्वमाचार्ययोगत एव फलतीति नाचार्ययोगं विना फलतीति श्रूयते च आचार्याद्धैव विद्या विदिता आचार्यवान्पुरुषो वेद इति च ब्रह्मार्थयोगेन च ब्रह्मचर्यं यद्वद्गुरुसन्निधौ शुश्रूषाचरणं तद्ब्रह्मचर्यं ब्रह्मार्थयोगेन फलति स्वात्मनश्चित्सदानंदाद्वितीयब्रह्मैकत्वसंपादनद्वारेण फलतीत्यर्थः १४ ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम ॥

स॰सु॰ २२

कस्य कुत्र प्युपलभ्यत इत्यत आह नैवेति ज्ञानं च सत्यं चेत्युपक्रम्य महाव्रतत्वाद्यपाह्लाल्लण स्येति येगुणा उक्ता
स्तत्त युक्त स्यात्मनि दृश्यते तत्त्वेरं श्रवणन यद्दादि वदित्य तया ज्ञियते ऽसदित्वात्मन्येवात्मत्त यालिघ्यत्तीत्यर्थः
२२ इदानीं तस्य रूपं तदृष्टेनं तत्स्थानं च श्लोकद्वयेन निदर्शयति ऽप्रवारणीयमिति यदिदं महाव्रतस्या
त्मनि दृश्यते तद्वारणीयं ब्रह्म सर्वगतत्वात् तमसो ज्ञाना त्परस्तात्तद्ब्रह्म अंतनोभ्येति प्रविष्ट्यालि जगद्
नाशकाले प्रलयकाले ऽप्रणीय रूपं च तथा प्यणीयसां महत्त्वरूपं त्वपि पर्वतेभ्यः श्रूयते च ऽअणोरणी
यान्महतो महीयानिति २३ दृष्टं तेचयेः एतन्महत्वा दृयो लोके तदेतत्सर्वं जगद्ब्रह्मैव रूपेण ब्रह्मसलिसं

नैव ऋक्षु नैव यजुःष्वथर्वसु न चैव दृश्यत्यमलेषु सामसु रथंतरे बार्हद्रथे वापि राजन्महाव्रतस्
स्यात्मनि दृश्यते तत् २२ ऽअवारणीयं तमसः परस्तात्तदंततोभ्येति विनाशकाले ऽअणी
यरूपं च तथाप्यणीयसां महत्स्वरूपं त्वपि पर्वतेभ्यः २३ तदेतदह्ना संस्थितं भाति स
र्वं तदात्मनि पश्यति ज्ञानयोगात् तस्मिन्जगत्सर्वमिदं प्रतिष्ठितं य एतद्विदुरमृता
स्ते भवंति २४ इति श्रीमहाभारते उद्योगपर्वणि सनत्सुजातीये तृतीयोध्यायः ३

स्थितं तदात्मनैवात्मत्वेन भाति श्रूयते च तस्य भासा सर्वमिदं विभातीति येन सूर्यस्तपति तेज
सेद्धश्चेति लब्ध्वा सर्वं पश्यति ज्ञान कर्मयोगेन तस्मिन्नेव परमात्मनि जगत्सर्वं प्रतिष्ठि
तं य एतद्विदुरमृतास्ते भवंति २४ इति श्रीशंकराचार्यविरचिते सनत्सुजातीयविवरणे नाम
तृतीयोऽध्यायः ३ समाप्तः ॥

22

ज्ञानेन यद्विद्वान् पश्यति ब्रह्म तत्किमिति पृच्छति धृतराष्ट्रः । आभातीति यद्ब्रह्म विद्वान् पश्यति तत्किं शुक्लमिवा
भाति लोहितमिवाथ कृष्णमथांजनं काद्रवमिवाभाति यत्र देशे भाति कथं रूपं तदमृतमक्षरं परं ब्रह्म कथं
रूपमित्यभिप्रायः १९ एवं पृष्टः प्राह भगवान् नेति द्वाभ्यां नैतद्ब्रह्म शुक्लादिरूपत्वेनाभाति भासते ।
अरूपत्वाद्ब्रह्मणः श्रुतेश्च ततो यदुत्तरे तेदं न तारं तदरूपमनामयमिति अशब्दमस्पर्शमरूपमव्ययमि
तिच तथा न पृथिव्यां तिष्ठति नान्तरिक्षे तथाच श्रुतिः न्यत्रानवस्थानं दर्शयति स भगवः कस्मिन् प्रतिष्ठि
त इति स्वे महिम्नीति कस्मात्पुनः कारणात् पृथिव्यादिषु न तिष्ठतीत्याह नैतत्समुद्रे सलिलं पंचर

धृतराष्ट्र उवाच आभाति शुक्लमिव लोहितमिवाथो कृष्णमथांजनं काद्रवं वा तद्ब्राह्मणः पश्यति य
त्र विद्वान् कथं रूपं तदमृतमक्षरं परं ब्रह्म १९ सनत्सुजात उवाच नाभाति शुक्लमिव लोहितमिवा
थो कृष्णमिवांजनं काद्रवं वा न पृथिव्यां तिष्ठति नान्तरिक्षे नैतत्समुद्रे सलिलं बिभर्ति २० न तारकासु
न च विद्युताश्रितं न चाभ्रेषु दृश्यते रूपमस्य न चापि वायौ न च देवतासु नैतच्चन्द्रे दृश्यते नोत सूर्ये २१

भूतात्मकं देहं बिभर्ति सलिलशब्दो भूतपंचकोपलक्षणार्थः यथा अप एव ससर्जादौ तासु वीर्यमवा
सृजदित्यत्राप्शब्दो भूतपंचकोपलक्षणार्थः अत एव पंचाग्निविद्यायां पंचम्यामाहुतावापः पुरुषवच
सो भवंतीति अपामेव पुरुषशब्दवाच्यत्वं एतदुक्तं भवति यदि ब्रह्मणः संसारान्तर्वर्तित्वं भवेत्तदा संसारानु
प्रविष्टत्वात् घटादिवदीदृग्रूपादिमत्त्वं अन्यस्मिंश्चावस्थानं भवेत् इदं तु पुनरशब्दादिलक्षण
त्वात् संसाराननुप्रविष्टमेव ब्रह्म तस्माद्रूपादिरहितमेतदिति २१ ॥श्रीराम ॥श्रीराम राम॥

स॰ मु॰ २३

इदानीं पूर्णवाक्यार्थं कथयन्ति पूर्णादिति पूर्णाद्देशतः कालतो वस्तुतश्चापरिच्छिन्नात्परमात्मनः पूर्ण
मेवोद्धरंति जीवरूपेणाद्य पूर्णं स्वरूपं मुद्धृतं जीवात्मनावस्थितत्वात् अतः पूर्णादेवमुद्धृतत्वादिदमपि
जीवस्वरूपं पूर्णमेव प्रचक्षते विद्वांसस्तथा हरंति पूर्णजीवात्मनावस्थितत्वात् पूर्णात्मरूपमात्रं दे
हेंद्रियाद्यनुप्रविष्टं देहेंद्रियादिभ्यो निष्क्रम्य पलत्साक्षिणं सर्वांतरं देहद्वयादुद्धरंतीत्यर्थः अत उद्धृते
नैवमप्लभूतेन पूर्णानंदेनावशिष्यते तेनैव पूर्णानंदेन ब्रह्मणा संयुज्यते चित्सदानंदाद्वितीयब्र
ह्मात्मनावशिष्यत इत्यर्थः पूर्णमेवावशिष्यत इति वा पाठः यद्वा देहेंद्रियादिभ्यो निष्क्रम्यतत्

पूर्णात्पूर्णमुद्धरंति पूर्णात्पूर्णं प्रचक्षते हरंति पूर्णात्पूर्णं च पूर्ण
मेवावशिष्यते योगिनस्तं प्रपद्यंते भगवंतं सनातनं ॥३॥

साक्षिणं सर्वांतरं देहद्वयादुद्धरंति तदा पूर्णमेवावशिष्यत इत्यर्थः तथा च श्रुतिः पूर्णमद इत्यादि
अस्यायमर्थः पूर्णमदस्ताच्छब्दवाच्यं जगत्कारणं ब्रह्म पूर्णमिदं त्वंशब्दनिर्दिष्टं प्रत्यगात्मस्वरू
पं कथमनयोस्तत्त्वंपदयोः पूर्णत्वमितिचेत्तत्राह पूर्णादनवच्छिन्नात्पूर्णमेवोदच्यते जीवेश्वर
रूपेण यस्मात्तस्मादनयोः पूर्णत्वमित्यर्थः पूर्णस्य तत्त्वमात्मनावस्थितस्य पूर्णरूपमादाय तत्त्वं
पदार्थशोधनं कृत्वा शोधितपदार्थः सन्नित्यर्थः पूर्णमेव ब्रह्मावशिष्यते ब्रह्मैव भवतीत्यर्थः
यः पूर्णस्वरूपस्तं परमात्मानं योगिनः प्रपद्यंते ॥ २ ॥ राम ॥ राम ॥ राम ॥ राम ॥

पू॰ २३

हरिः ॐ ॥ अपारणीयं तमसः परस्तादित्यादिना ब्रह्मणो रूपं निर्दिश्य येन तदात्मचित्ते पश्यति ज्ञानयोगादिति।
ज्ञानयोगेनात्मदर्शनमुक्तं पुनरपि तस्य स्वरूपं दर्शयित्वा योगिनस्तद्रूपं पश्यन्तीत्याह यत्तदिति यद्ब्रह्म
चित्ते पश्यन्ति ज्ञानयोगाद्यद्दर्शनात्तागमनलाभवति तच्छुक्रं शुद्धमविद्यादिदोषरहितं महज्ज्योतिः सर्वाव
भासकत्वात् श्रूयते च तस्य भासा सर्वमिदं विभातीति दीप्यमानं भ्राजमानं महद्यशः श्रूयते च य
स्य नाम महद्यश इति यद्वै ब्रह्म देवा इन्द्रादय उपासते श्रूयते च तद्देवा ज्योतिषां ज्योतिरायुर्होपासते
ऽमृतमिति यस्मात्परं ज्योतिषो ब्रह्मणः अर्क आदित्यो विराजते येन सूर्यस्तपति तेजसेद्ध इति श्रु

सनत्सुजात उवाच यत्तच्छुक्रं महज्ज्योतिर्दीप्यमानं महद्यशः यद्वै देवा उपासते यस्मादर्को विरा
जते योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं १ शुक्राद्ब्रह्म प्रभवति ब्रह्म शुक्रेण वर्द्धते तच्छु
क्रं ज्योतिषां मध्येऽतप्तं तपति तापनं योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं ॥ २ ॥ श्रीराम

तेः एवंभूतं परमात्मानं सनातनं भगवन्तं योगिन एव पश्यन्ति न पुनर्ज्ञानयोगहीनाः १ इदानीं परस्मा
द्ब्रह्मणो हिरण्यगर्भोत्पत्तिं दर्शयति शुक्रादिति शुक्राच्छुद्धात्सर्वोत्तमाद्ब्रह्मणो हिरण्यगर्भाख्यं
ब्रह्म प्रभवति उत्पद्यते तथोत्पन्नं ब्रह्म शुक्रेण वर्द्धते विराडात्मना तच्छुक्रं शुद्धं ब्रह्म ज्योतिषामादि
त्यादीनां मध्ये तैरतप्तमप्रकाशितं सत्तपति स्वयमेव प्रकाशते तेषामपि तापकं प्रकाशकं सद्यो
न्यानवभास्यः स सर्वावभासकः स्वयमेव भासते तं भगवन्तं योगिन एव पश्यन्ति ॥ २ ॥ श्री ॥

स॰ पु॰
२४

इदानीं ज्ञानिनः स्वात्मन्यवस्थानं दर्शयति वृक्ष इति ॥ वृक्षस्य व्ययकर्मणः परमेश्वरस्य चेश्वरात्मनावस्थितस्य रथ
स्य शरीरस्य त्रैलोक्यात्मनावस्थितस्य च वृक्षे वृक्षमरणात्मके देहे लिंगत्वं हेतुमंतं ग्रस्तावंतं ॥ अत एव दिव्यमप्रा
कृतं जरामरणादिधर्मवर्जितं दिवि द्योतनात्मके ॥ अनुदितानस्तमितज्ञानात्मनावस्थिते पूर्णे नेदे प्रसत्ता वहंस्य
स्थाः एतदुक्तं भवति यद्यपीन्द्रियाक्रियाभावतो विषयेषु वर्तते तथापि विज्ञानसारथिना समाहितः प्रमाणानि
केतुमंतं पुरुषं दिव्यं वहंति न पराग्विषय इति ॥ हृदं केतवं श्रोतु ॥ आत्मानं रथिनं विद्धि शरीरं रथमेव तु इत्यादि
ना यत्र परमात्मनि वहंति तं भगवंतं योगिन एव प्रपश्यंति ॥ ५ ॥ इदानीं नानेन संदृशं किंचिद्धितं इत्याह अस्यैव
न संदृश इति ॥ अस्य परमात्मनो रूपं न संदृशे तिष्ठति नास्य संदृशे वर्तते नानेन संदृशं किंचिद्धि घन इत्यर्थः
श्रूयते च न तस्य प्रतिमा अस्ति यस्य नाम महद्यश इति ॥ अत एवोपमानाद्यविषयत्वं तथा च न चक्षुषा पश्यति

वृक्षे रथस्य पतिं हंतं वृक्षस्याव्ययकर्मणः केतुमंतं वहंत्यश्वास्तं दिव्यमजरं दिवि योगिनस्तं प्रपश्यंति
भगवंतं सनातनं ॥ ५ ॥ न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चिदेनं मनीषया यो मनसा
हृदा च य एनं विदुरमृतास्ते भवंति योगिनस्तं प्रपश्यंति भगवंतं सनातनं ॥ ६ ॥ राम ॥ राम ॥

२१

कश्चिदेनं सर्वांतरं परमात्मानं कथं तर्हि पश्यंति मनीषया अध्यवसायात्मिकया बुद्ध्या ॥ अथवा मनसा संकल्पवि
कल्पात्मकेन हृदा च हृदं साधनभूतेन हृदयं विना नान्यत्र परमात्मन उपलब्धिः संभवतीति मत्वा हृदा चेत्यु
क्तं ॥ अथवा न केवलं मनोबुद्धिमात्रेणापि तु हृदा च हृदयस्थेन परमेश्वरेणानुगृहीताः संतो य एनं परमात्मा
नं विदुरयमहमस्मीति ते अमृता अमरणधर्माणो भवंति ॥ अथवा हृदा हृदयेन परमात्मना तथा च हृदिस्थे
परमात्मनि हेत्ववं निर्वक्ति स वा एष आत्मा हृदि तस्यैवं निरुक्तं हृदयमिति तस्माद्धृदयमहरहर्वा
एवंवित्स्वर्गं लोकमेतीति तथा च श्रुतिस्ता एधीनामात्म सिद्धिं दर्शयति यस्य देवे परा भक्तिरिति य एनं
वेविदित्वा अमृता भवंति योगिन एव तं पश्यंति ॥ ६ ॥ राम ॥ राम ॥ राम ॥ राम राम ॥

श्रि
२४

इदानीं द्वासुपर्णा इति मंत्रार्थं कथयति । आप इति । अस्मात्परमात्मनः । आपः प्रथमं सृष्टाः तथा चाह मनुः
। अप एव ससर्जादौ इति भूतपंचकोपलक्षणार्थोऽयं शब्दः । अनेन सूक्ष्मशरीरमभिहितं । प्रधानेतरम
पूर्वमेव सृष्टाः सलिलं भूतपंचात्मकं स्थूलदेहात्मकं सृष्टं तस्मिन्सलिले तस्य देहात्मना वस्थितस्य म
ध्ये अंतरिक्षे हृदयाकाशे उभौ जीवपरमात्मानौ देवौ द्योतमानस्वभावौ पुरुषौ श्रियातं वर्तेते न केवलमंतरिक्षे
श्रियातं आदृध्रीचीः सविषूचीर्वसानौ । आस्थि मुख्येन ध्रियमाणावस्थितौ । अथ अंचती आदृध्रीच्यो दि
शः प्राच्याद्याः सविषूच्य उपदिशा विषवेभ नाकृतासि सवर्ततः इति विषूच्यः प्राच्याद्याः सर्वा दिशो वसानौ

ग्रं =

आपो यां ह्यः सलिलं तस्य मध्ये उभौ देवौ पुरुषौ श्रियातं अंतरिक्षे आदृध्रीचीः सविषूचीर्व
सानावुभौ बिभर्त्ति पृथिवीं दिवं च योगिनस्तं प्रपश्यंति भगवंतं सनातनं ॥ ६ ॥

निर्देहादाचात्म २९

। आच्छायंता वुभौ बिभर्त्ति पृथिवीं दिवं च । एकोजीवः आत्मनः स्वाभाविकशक्त्यादानंदाद्वितीयब्रह्मा
त्मत्वमवगम्य आनात्मभावमापन्नः पृथिवीं भूतभौतिकलक्षणं कर्मफलानुरूपं सुखदुःखात्मकं देह
द्विकं बिभर्त्ति । अपरः दिवं द्योतनात्मकं स्वात्मरूपं बिभर्त्ति श्रूयते च द्वासुपर्णाविति यस्त्वात्ममायया ।
स्वात्मानं प्राणेन घनेनं कृत्वा तत्र नु प्रविश्य पालयिष्यं लाते तं भगवंतं योगिन एव पश्यंति ॥ ७ ॥ श्री ॥

स॰ सु॰
२५

इदानीं योगं दर्शयति । अपानमिति । अपानं गिरति उपसंहरति प्राणः प्राणं गिरति चंद्रमा मनः उपसंहरति मनसश्चंद्रमा
अधिदैवं यस्माच्चंद्रमा चेन्मन उच्यते तं चंद्रं मन आदित्यो बुद्धिर्गिरति बुद्धेरधिदैवतमादित्यं बुद्धिं गिरते परः परं ब्र
ह्मणैतद्युक्तं भवति समाधिवेलायामपानं प्राणे उपसंहृत्य प्राणं मनसि मनश्च बुद्धौ बुद्धिं परमात्मन्युपसंहृत्य स्वाभावि
चित्सदानंदाद्वितीयब्रह्मात्मनैवावतिष्ठत इत्यर्थः २० इदानीं परस्य जीवात्मनावस्थानं दर्शयति एकमिति हंसवि
द्यातत्कार्ये मिलितं हंसः परमात्माभ्रान्तिकलक्षणं संसारात्सलिलादुच्चरन् स्वैरं संसारादुद्धरिष्यन्नेमेनए
कं जीवाख्यं पादं नोत्क्षिपति नोद्धरति नोपसंहरति स्वं स्वं रूपे वर्तितत इत्यर्थः श्रूयते कठवल्लीषु एक
स्तथा सर्वभूतान्तरात्मेति कस्मात्पुनरेकं पादं नोत्क्षिपतीत्यत आह जीवाख्यं पादं स तत्तमृत्विजं सततं यजिन
यद्युत्क्षिपेत् स्वमायया स्वमात्मानं प्राणादीनं तं भेदं कृत्वानुप्रविश्य जीवात्मना यदि नानुतिष्ठेत् तदा न मृत्यु
जन्ममरणलक्षणः संसारो न भवेत् संसारिणो जीवस्याभावात् तथामृतममृतत्वं मोक्षो न भवेदननुप्रविष्ट

अपानं गिरति प्राणः प्राणं गिरति चंद्रमाः । आदित्यो गिरते चंद्रमादित्यं गिरते परः ॥ योगिनस्तं ॥ २० ॥ ए
कं पादं नोत्क्षिपन्ति सलिलाद्धंस उच्चरन् । तं चेत्सततमृत्विजं न मृत्युर्नामृतं भवेत् ॥ योगिनस्तं ॥ २१ ॥ अंगुष्ठमा
त्रः पुरुषोंतरात्मा लिंगस्य योगेन स याति नित्यं । तमीशमीड्यमनुकूलमाद्यं पश्यन्ति मूढा न विराजमानं ॥ योगिनः ॥ २२

स्य दर्शनासंभवात् तथा चान्तर्यामिणानुप्रवेशं दर्शयति हृदयं त्वमिति तथा चाथर्वणी श्रुतिः एकं पादं नोत्क्षिपति
सलिलाद्धंस उच्चरन् स चेदुत्क्षिपेत्स्याद्धं न मृत्युर्नामृतं भवेदिति एकं रूपं बहुधा यः करोतीति च यः पादरूपेण
जीवात्मना त्रिपाद्रूपेण च सच्चिदानंदाद्वितीयेन ब्रह्मात्मनावस्थितः परमात्मानं योगिन एव प्रपश्यन्ति
२१ केन तर्हि उपाधिना परः सदात्मना वर्तिष्यत इत्याशंक्याह परस्य वलिंगोपाधिकं जीवात्मानं दर्शयति अंगु
ष्ठमात्र इति संरुवति स्वदानं [illegible] सर्वभूतान्तरात्मा पुरुषः पूर्णः परमात्मा लिंगस्य योगेन अंगु
ष्ठपरिमाणापरिच्छिन्नः स याति संसर[illegible]नित्यं कस्मात्पुनः कारणं लिंगयोगेनांगुष्ठमात्रः संसरतीति तत्राह
यो लिंगस्य योगेनांगुष्ठमात्रः संसरति क[illegible]यतीत्यनुकूलं आद्यमादौ भवं विराजमानं दीप्यमानं यस्मात् मूढाः
अविवेकिनो देहद्व्यात्माभिमानिनो ब्रह्मस्वभावानंगमात्रसंसरंतीति यमात्मानं पश्यन्ति तं संसरंतं योगिन एव पश्यन्ति

वी

२८

द्रानींद्रियाणां विषयेषु प्रवृत्तिरित्यर्थः ॥ यत्त्वाह द्वादशानि येद्वादशपूर्णाः कर्मज्ञानेंद्रियाणि दश एकादशं मनो द्वादशी बुद्धि
स्ता आमनेक पुरुषापेक्षया एकैकस्य भूगत्वमुच्यते सरितः सरणशीला देवरक्षिता देवेन परमात्मना रक्षिताः मधुविष
यमधु ईशते नियमयंति ॥ प्रसां कर्थिणः स्वे स्वे विषयमनुभवंतीत्यर्थः यदेवमनुभवंति तदा तदनुविधायिनो विषय
पराः संचरंति घोरे संसारे तस्मादिंद्रियाणि विषयेभ्य उपसंहृत्य स्वात्मन्येव वक्तुं नये इत्यर्थः येन रक्षिता मध्वीश
नेते देवं योगिन एव पश्यंति ७ किंच ईशान दाशांतिकयोस्तत्राभिधानं तदर्द्धेति यथा मधुकरोऽर्द्धमासे पार्जितं मधु
अर्द्धमासं पिबति एवमसावनुपि भ्रमणशीलत्वात् संसारी तद्विषयं मधु अर्द्धमासं संचितमर्द्धमासं पिबति पूर्वजन्मसं
चितं कर्म ॥ अन्यस्मिन् जन्मनि भुंक्ते इति यावत् न भवेदृष्टेह कफलात्कर्मणः फलसिद्धिः कर्मानंतरभावित्वात् कथं पु
नरामुष्मिक फलात्कर्मणः फलसिद्धिः कर्मणो विनाशित्वाद्दित्याशंक्याह ईशानः सर्वभूतेषु हविर्भोगमकल्प

द्वादश पूर्णाः सरितो देवरक्षिता मध्वीशते तदनुविधायिनस्तदा संचरंति घोरं योगिनस्तं प्रपश्यंति भ
गवंतं सनातनं ७ तदर्द्धमासं पिबति संचितं भ्रमरो मधु ईशानः सर्वभूतेषु हविर्भागमकल्पयत् ।
योगिनस्तं प्रपश्यंति भगवंतं सनातनं ८ हिरण्यपर्णमश्वत्थमभिपत्य ह्यपक्षिकाः तत्र ते पक्षि
णो भूत्वा प्रपतंति यथासुखं योगिनस्तं प्रपश्यंति भगवंतं सनातनं ९ ॥ राम राम राम ॥

यदिति भवेदयं दोषः यदि केवलकर्मणः फलसिद्धिः स्यात् ईशानः परमेश्वरः कालप्रयमापेक्षः सन् सर्वभूतेषु स
र्वप्राणिषु प्राणाग्निहोत्रस्येतरस्य च तत्तत्कर्मानुसारेण हविर्भूतमन्नादिकमकल्पयत् य ईशानः सर्वभूतेषु
हविर्भोगमकल्पयत् तं योगिन एव पश्यंति ८ किंच के मे ने मध्वादिनो ये वं भ्रम्यमाणाः परिवर्तत एव सर्व
दो किं वा ज्ञानं लब्ध्वा मुक्ता भवंतीत्यत्राह हिरण्येति ये अपक्षकाः ज्ञानपक्षरहिता मध्वादिनो परिवर्तंते ते हि
रण्यपर्णमभिपत्य हि तं चरमाण्यं चेति हिरण्यं हितं च रमणीयं च पर्णं यस्याश्वत्थस्य तथा चाह भगवान् वासु
देवः छंदांसि यस्य पर्णानीति हिरण्यपर्णमश्वत्थमभिपत्य आश्रित्य वेदसंयोगिनस्तस्माद् दिदेहं प्राप्येत्यर्थः तत्र ब्रा
ह्मणादिदेहे पक्षिणो ज्ञानिनो भूत्वा तथा च ब्राह्मणं ये वै विद्वांसस्ते पक्षिणो ये विद्वांसस्ते ह्यपक्षा इति प्रपतंति
यथासुखं मुक्ता भवंतीत्यर्थः ये ज्ञात्वा प्रपतंति तं योगिन एव पश्यंति ९ ॥ राम ॥ राम ॥ राम राम ॥

ब्र॰ सु॰ २६

किंच एवमिति यएवंरूपः प्रज्ञानैकरसो ब्रह्मरूपः सन्नातोऽस आत्मा महान् संपद्यते ब्रह्मैव संपद्यत इत्यर्थः यावत्कर्म
ग्निः सर्वोपसंहर्तृत्वं कारणं सकारणं कार्यं गिरन्स्वात्मन्युपसंहरन् यो वेत्ति पुरुषं ज्ञानैकरसं पुरुषं पूर्णं पुरिशायं वेद
ऽयमहमस्मीति साक्षाज्जानाति तस्य प्रज्ञानरूपं परमात्मानं मा मत्वेनावगच्छत इहास्मिन्नेव देहे आत्मा न रि
ष्यते न विनश्यति विदुष उत्क्रांतेरसंभवात् उत्क्रांतिनिमित्तत्वाद्विनाशस्य तथा च श्रुतिः प्रश्नपूर्वकं मुक्तात्म
भावं दर्शयति उदस्मात्प्राणा उत्क्रामंति आहो स्विन्नेति नेति होवाच याज्ञवल्क्यः अत्रैव समवलीयंते न तस्य
प्राणा उत्क्रामंति ब्रह्मैव सन्ब्रह्माप्येति यएवं वेदेति च यं विदित्वा न रिष्यते तं योगिन एव पश्यंति ६ यस्मात्
द्वितीयब्रह्मात्मनो विनाशस्तस्मात्सदासदेति स दा सदा सर्वदा हानिर्पूर्णस्वरूपः तस्मात् सच्चिदानंदाद्वितीयब्रह्मा
त्मत्वेनाभिमन्यते यः सदा सदा सद्भूतो भवति तस्य न मृत्युर्जननमरणलक्षणः संसारो न भवेत् अमृतं कुतः मृत्यु

एवंरूपो महानात्मा पावकं पुरुषो गिरन् यो वै तं पुरुषं वेद तस्येहात्मा न रिष्यते योगिनस्तं प्रपश्यंति ० १६ सदा
सदासद्भूतः स्यान्न मृत्युरमृतं कुतः सत्यानृते सत्यसमानुबंधिनी सतश्च योनिरसतश्चैकमेव योगिनस्तं ०
१७ अंगुष्ठमात्रः पुरुषोंऽतरात्मा न दृश्यते सो हृदये निविष्टः अतश्च एवाहोरात्रमतंद्रितस्तं मत्वा कविरा
त्मप्रसन्नः १८ तस्माद्वायुरायातस्तस्मिंश्च प्रलयस्तथा तस्मादग्निश्च सोमश्च तस्माच्च प्राणआगतः
१९ तत्प्रतिष्ठा तदमृतं लोकास्तद्ब्रह्म तद्यशः भूतानि जज्ञिरे तस्मात्प्रलयं यांति तत्र च ॥ २० ॥ श्री ॥

त्यपेक्षत्वादमृतत्वस्य तदभावे कुतः प्रसक्तिः तथा च श्रुतिः मृत्युर्नो त्वममृतं कुत इति सत्यानृते वर्त्तेते सत्यसमा
नुबंधिनी सत्यमेकमधिष्ठानमनुबध्य वर्त्तेते रज्वामिव सर्पः कथमेतदवगम्यते सत्यानृते सत्यसमानुबंधिनी
ति तत्राह असतश्च लौकिकस्य योनिः कारणं तत्सत्यमेकमेवाद्वितीयं सच्चायस्मात्त्रं वदंति तस्मात्सत्यानृते स्व
कारणभूतं सत्यमनुबंधिनी इति यदात्मनस्तस्मात्कारणान्मत्यो विनाशः यमनुबध्य सत्यानृते वर्त्तेते तं योगिन
एव पश्यंति १७ अंगुष्ठमात्र इति आकाशादिदेहांतं जगत्सृष्ट्वा हृदये निविष्टश्चराचरात्मा सन्न दृश्यते हे
नात्मना श्चिसरानंदाद्वितीयेन तमहोरात्रमतंद्रितो भूत्वा कोऽपि विवेकी योगी निश्चयसर्वांतरात्मानं मत्वा कवि
रात्मप्रसन्नः कृतार्थः संस्नित्यर्थः १८ ब्रह्मणो विश्वोपादानत्वं नयाधिष्ठानत्वं चाह तस्माच्चेति द्वाभ्यां स्पष्टार्थौ श्लो
कौ ॥ १९ ॥ २० ॥

इदानीमिंद्रियाणां विषयाणां चानर्थहेतुत्वं दर्शयति गृह्णंतीति यथा सर्पा गह्वरेभ्यो निष्क्रम्य स्वेन वक्त्रेन विषप्रदानेन मर्त्यो
ऽर्पयंनीत्वा गह्वरेषु गृह्णंति स्वात्मानं प्रच्छादयंति एवमिंद्रियसर्पाः श्रोत्रादिषु शयनाच्छ्रोत्रादिभ्यो निःक्रम्य स्वेन वक्त्रेन
विषयविषप्रदानेन मर्त्यान् धर्षयंनीत्वा गह्वरेषु गृह्णंति स्वात्मानं प्रच्छादयंति ते विप्रमुखान्ते विषय विषयाभिभूताविद्वेषणमुखेन तद्घातिरितं न किं [illegible] तात्पर्यः तथा च श्रुतिः यथा प्रियया संपरिष्वक्त इति ते इंद्रियैर्हृता विषकल्पा
विषयास्तैर्मर्त्यान्मोहयंते पुनःपुनर्मोहहेतवो भवंति यद्दृश्यविषयैर्मोहनं तद्भवाय गर्भजन्मजरामरणसंसारा
य भवति यमादि मनुकूलं त्यमा यम [illegible] विबयविषं धामुष्यंति ते योगिन एव पश्यंति २३ तानि नामोक्षस्व
रूपमाह असाधनावेति ये असाधना शमदमादिसाधनरहिता ये च शमदमादिसाधनयुक्ताः ससाधनास्ते षु
समानमात्मरूपं साधारणं हृष्यते मानुषेषु तथा समानामपि तेषां मोक्षस्य तदस्य संसारस्य सत्त्वि चासत्ति च तेषां

गृह्णंति सर्पा इव गह्वरेषु क्षयं नीत्वा स्वेन वक्त्रेन मर्त्यान् ते विप्रमुखाञ्जिनान्विमदास्ते दत्ता भोगा मोहयंते भवाय।
योगिनस्तं० २३ असाधना वापि ससाधना वा समानमेतद्दृश्यते मानुषेषु समानमेतत्परमन्तरस्य मुक्ता
त्तत्रमध्वरूत्संप्रमायुः योगिनस्तं० २४ उभौ लोकौ विद्यया व्याप्य याति तदाहुतं नाहुतमग्निहोत्रं ॥
माते ब्राह्मीत्वघुमा मा दधीत प्रज्ञानं यत्प्रज्ञानमधीरा लभंते योगिनस्तं प्रपश्यंति भगवंतं सनातनं २५

मध्ये युक्ताः शमदमादिसाधनयुक्ताः स्तिताभ्यन्विष्टाः परमपरमध्वःमधुनः उत्संप्रमायुः पूर्णानंदब्रह्म प्राप्नुवंतीत्यर्थः
यमुत्संप्रमायुः पूर्णानंदयुक्ताः प्राप्नुवंति ते योगिन एव पश्यंति २४ किं च उभौ लोकौ इहपरौ विद्यया ब्रह्मात्मविद्यया
व्याप्य याति तत्पूर्णानंदं ब्रह्म यस्मादुभौ लोकौ विद्यया व्याप्य याति तस्मात्तदाहुतं चाग्निहोत्रं अनेनात्मज्ञानेनाभि
मुखेन हुतं भवति सर्वमग्निहोत्रादिकर्मफलं चानेनैव संपादितं भवतीत्यर्थः तस्मादुभौ लोकौ विद्यया व्याप्य या
ति यस्मात्तदाहुतं चाग्निहोत्रं मोहितं तस्मान्मा ते नत्व ब्राह्मी त्वं स्वविषया विद्या त्वघुता त्वघुत्वमसंभावकमेवदार
धीतन्न करोति अपि तु प्रज्ञानं तमसः परं परमात्मानमात्मत्वेन सदावारयति यत्प्रज्ञानं विद्यतत्त्वपरमात्मानमा
त्मत्वेनावगच्छत तत्तदाप्रज्ञानमिति नाम स्यात् ब्रह्मेति नाम भवतीत्यर्थः तथा च श्रुतिः प्रज्ञानं ब्रह्मेति तत्
प्रज्ञानं ब्रह्म धाराधीमंतो लभंते यत्प्रज्ञानं ब्रह्म धीमंतो लभंते ते योगिन एव पश्यंति ॥ २५ ॥ श्रीराम

सं०सु० इदानीं मुक्तावस्थायां दृष्टिमेव वामदेवादिवदात्मानुभवं दर्शयति अहमेवास्मीति सार्द्धैस्त्रिभिः श्लोकैः हे धृतराष्ट्र
२७ अहमेवास्मि वो युष्माकं माता जननी पिता जनकोप्यहमेव युष्माकं पुत्रो दुर्योधनादिः पुनरहमेवास्मि किं ब
हुना आत्माहमस्य सर्वस्य प्राणिजातस्य यच्च नास्ति यदस्ति च तस्याप्यहमेवात्मा २६ एवं तावदाधिभौ
तिकं पित्रादिकं पुत्रादिकं दर्शितं अथेदानीमाधिदैविकं पित्रादिभावं दर्शयति पितेति पितामहोस्मि स्थवि
रो वृद्धः इंद्रादिः पितामहोस्मि अनादिसिद्धः परमेश्वरः सोप्यहमेव यः पिता इंद्रादेर्हिरण्यगर्भः सोप्यहमेव।
तथा मम यूयमात्मस्था एव एवं यूयं सर्वपरमार्थतो न मे आत्मनि व्यवस्थिताः नचाप्यहं युष्मासु

अहमेवास्मि वो माता पिता पुत्रोऽस्म्यहं पुनः। आत्माहमस्य सर्वस्य यच्च नास्ति यदस्ति च २६ पितामहो
स्मि स्थविरः पिता पुत्रश्च भारत। ममैव यूयमात्मस्था न मे यूयं न चाप्यहं २७ आत्मैव स्थानं मम ज
न्म चात्मा ओतप्रोतोहमजरप्रतिष्ठः अजश्चरो दिवारात्रमतंद्रितोहं ज्ञात्वा चैकविरात्तिनमत्त २८

स्थितः तथा चाह भगवान् मत्स्थानि सर्वभूतानीति २७ आत्मैवेति यद्यपि न ममात्मनि यूयं व्य
व स्थिता न चाप्यहं युष्मासु व्यवस्थितः तथाप्यात्मैव स्थानं ममात्मैवाश्रयः जन्म चात्माऽस्मादेवोत्प
न्नः सर्वमुत्पन्नं तथा च श्रुतिः आत्मन एवेदं सर्वमिति ओतः प्रोतोहमेव ओतः प्रोतस्सूत्रेण व्यवस्थि
तः जगदात्म युष्माकं जनयिता अजरप्रतिष्ठः अजरे जरामरणवर्जिते स्वे महिम्नि तिष्ठतीत्यजरप्र
तिष्ठः तथा च श्रुतिः स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीति ॥२८॥ राम॥ राम॥ राम राम

सर्वमिदं ब्राह्मणः सकाशात्सुद्भूतं तत्रैव लीयत इति श्लोकद्वयेनोक्तं। तदेव विवृणोति स्पष्टार्थः श्लोकः २२ इदानीं ब्रह्म
णोनंतत्वं कथयति यः सहस्रमिति यः पुरुषः सहस्राणां सहस्रं पक्षानाहत्यात्मनः पक्षान्कृत्वा पतेदनेक
कोटिवर्षपर्यंतं पुरुषो नांतं गच्छेत्सर्वकारणस्य परमात्मनः यद्यप्यसौ मनोजवस्तथापि सुपातेन गच्छेद्यस्माद्धेतं तन
गच्छेत्तस्मादनंतः परमात्मेत्यर्थः योनंतः परमात्मा तं योगिन एव पश्यन्ति २२ किंच दर्शनमिति अदर्शने दर्शना
योग्यविषये निवृत्तिरूपमस्य परमात्मनः तथा च श्रुतिः न संदृशे तिष्ठति तथापि परमात्मानं पश्यन्ति के ते सु
समिद्धसत्वाः सुष्ठु समिद्धं सम्यग्दीप्तं सत्वमंतःकरणं यज्ञादिभिर्विमलीकरणसंस्कारद्वारेण येषां ते सुस
मिद्धसत्वाः हीना रागद्वेषादिमलरहिता विशुद्धसत्वा मनीषी मनसाभिपश्येत् यतो नं परमात्मानं विदुरहं मनसी

उभौ द्यौ पृथिवी दिवं च दिशश्च भुक्तं भुवनं बिभर्ति यस्माद्दिशः सरितश्च स्रवंति तस्मात्समुद्रा विहिता महां
तः २१ यः सहस्रं सहस्राणां पक्षानाहत्य संपतेत् नांतं गच्छेत्कारणस्य यद्यपि स्यान्मनोजवः २२ अदर्श
ने तिष्ठति रूपमस्य पश्यन्ति चैनं सुसमिद्धसत्वाः हीनो मनीषी मनसाभिपश्येद्ये नं विदुरमृतास्ते भवंति
२३ इमं यः सर्वभूतेष्वात्मानमनुपश्यति अन्यत्रान्यत्र युक्तेषु स किं शोचेत्ततः परं २४ ॥ यथो
दपाने महति सर्वतः संप्लुतोदके एवं सर्वेषु भूतेषु ब्राह्मणस्य विजानतः ॥२५॥ राम॥ रामराम॥

ति अमृता अमरणधर्माणस्ते भवंति २३ इमामिति इमं सर्वांतरं सर्वभूतेषु सर्वप्राणिष्वात्मानं योनुपश्यति कथं।
भूतेष्वनुपश्यति अन्यत्रान्यत्र देहेंद्रियादियुक्तेषु शरीराद्यभिमानिषु स किं शोचेत्ततः परं सर्वभूतेष्वात्मानं
पश्यंस्ततः परं किमर्थमनुशोचेति सर्वभूतेष्वात्मानमनुपश्यन्कृतार्थत्वान्नानुशोचतीत्यर्थः तथा च
श्रुतिः तत्र को मोहः कः शोक एकत्वमनुपश्यत इति २४ तदेवाह यथेति यथा सर्वतः संप्लुते महति उद
पाने अर्थो नास्ति एवं सर्वभूतेषु ब्राह्मणस्य विजानतः किंचिदपि प्रयोजनं न विद्यत इत्यर्थः तथा चा
ह भगवान्वासुदेवः नचास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रय इति ॥२५॥ राम॥ राम॥ रामराम॥

सु० अणोरिति अणोः सूक्ष्माद् अणीयान् सूक्ष्मतरः सुमनाः शोभनं मनो रागद्वेषमदमात्सर्यशोकमोहादिधर्मवर्जि-
तं केवलं चित्सदानंदादिरूपी यद्वा सात्त्विकार्यं यस्य स सुमनाः सर्वभूतेषु सर्वप्राणिषु हृदयकमलमध्ये अहमेवा-
वस्थित आत्मतया एवं तावत्स्वानुभावो दर्शितः इदानीं न केवलं मम स्वानुभव एवात्र प्रमाणम् अन्येषामप्येवमेवाग-
मतीत्याह पितरमित्यर्द्धेन येन्ये सनकसनंदनवामदेवादयो ब्रह्मविदस्तेपि पितरं सर्वभूतानां सर्वप्राणि-
नां पिता जनयिता परमेश्वरस्तं पुष्करे हृत्पुण्डरीकमध्ये निहितं विदुः परमात्मानमात्मत्वेनावगच्छंति
इत्यर्थः तथा च श्रुतिः सोऽयमनुभवं दर्शयति तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे इति वृहदारण्यके तस्मा-
दात्मा आस्तेति तैत्तिरीयके सामगानेन स्वानुभवो दर्शितः आत्मनः कर्तृत्वद्योतनार्थं तयोश्चात्मे-

अणोरणीयान् सुमनाः सर्वभूतेष्ववस्थितः पितरं सर्वभूतानां पुष्करे निहितं विदुः ॥ २९ इति श्री
महाभारते शतसाहस्र्यां संहितायां वैयासिक्यामुद्योगपर्वणि सनत्सुजातीये चतुर्थोऽध्यायः ४॥

पि तल्लवकारश्च अहमन्नमित्यादिना विद्वदनुभवानुदर्शितः तत्रैव श्लोकाः भवंति नित्यशुद्धबुद्धमुक्त-
स्वाभावमीशानमात्मना भावयन् षडिंद्रियाणि सान्नियम्य निश्चलः अस्ति वस्तु चिद्घनं जगत्प्रसूति
कारणं मनश्चरंत दृढ्वं जगत्तमो नुदं चयतेत्तत्पदैकवाचकं सदामृतं निरंजनं चित्तवृत्तिदर्श सुखेन
दृश्यहं तदस्म्यहमिति २९ इति श्रीशंकरभगवत्पादकृतौ सनत्सुजातीयभाष्ये चतुर्थोऽध्यायः ४॥
॥ संवत् १८॥८५॥ मासे प्रथमाषाढे शुक्ले पक्षे चतुर्दश्यां गुरुवासरे ॥ राम राम राम राम ॥
॥ लिपिकृतं भवानीजर ॥ असोधामध्ये ॥ गिरधारी मिश्र छित्तौंदीमध्ये तस्मैप्रयोजनाय ॥ ॥

शिव
२८

29